Barcode : 99999990077588
Title - Ashtpushpika
Author - Acharya, Neelkamal
Language - sanskrit
Pages - 215
Publication Year - 1948
Barcode EAN.UCC-13



DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj)

Students can retain library books only for two weeks at the most

BORROWER S No	DUE DTATE	SIGNATURE

अष्टपुष्पिका ।

वाराणसीन्दुविश्वविद्यालयान्यतमसंस्कृताध्यापक-

श्रीनीलकमलभट्टाचार्य्य एम. ए.-

संकलिता ।

KO-

Printed by Freeman & Co Ld , at their Tara Printing Works, Benares

PREFACE

The object of the present compilation is to provide a suitable reading book for Intermediate students The pieces have been drawn from standard works, representing a variety of styles, as also of scenes and sentiments agreeable to the taste and capacity of the young readers they are intended for

A vocabulary (rather exhaustive) in alphabetical order with page reference where necessary and notes (mostly critical and suggestive) have been appended with a view to encourage self study on a sounder basis

A few remarks of a general character in connection with the work will not, I think, be out of place here

The title of the work is अष्पुष्पिका—a term with a classical sanction for its use, the word having occurred once in the Kadambari and twice in the Harshacharita The eight flowers that form the collection (both numerically and specifically) are enumerated as जपा, पद्म, द्रोण, करवीर अतसी, and अपराजिता, with two others (which are जाति and अशोक according to one authority and फुल्लर and चम्पक according to another) The adoption is somewhat unwarranted, पुष्प, ordinarily not enjoying the same latitude of figurative use as its English equivalent 'flower'

The expression सत्य शिव सुन्दरम, which appears at the opening page of the book, requires a word of explanation It claims no upanishadic originality like सत्य ज्ञानमनन्तम (ब्रह्म), but is a literal translation, ascribed to the founder of the present day eclectic Brahmo sect, after the upanishadic model, of the English phrase 'The

true, the good and the beautiful' I have chosen it for the motto of my work as summing up in a nutshell the essentials of belles lettres

Of the contents of the compilation, the first piece—Raghu s expedition—has a peculiar interest for the historian The conception however, is not an original one, the poet having indubitably had in view the Pandavas दिग्विजय of the Mahabharata With all deference to what historians would say on the point, my personal conviction (for which I reserve my evidence) about the extent of India as pictured in the piece takes me far beyond to Persia ; I may remark, en passant, that the term यवन about the precise application of which there is so much contention, applies in the context to the Persians

I take the liberty to add here that my conclusion that the expedition took one full year (vide p 42 of the Notes) may, in view of the conventional termination of warfare during the rains as alluded to in sl 16 be modified in favour of ten months (ending with the advent of rains)

The next piece—Rama's return to Ayodhya in an aerial car—is no original conception, the poet having borrowed the scene from the Ramayana The piece gives an inkling to the scientific achievements of our ancestors

The third—Parvati's penance—sets forth an ideal of unflinching devotion—the sine quâ non of all true success in life

The appreciation of the fourth—the fourth act of the 'Sakuntala—finds expression in the couplet—काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥ The four slokas alluded to are those numbered 7, 10, 17 and 18 in the piece The Prakrta portions including the two आर्याs, appear in their Samskrit forms in this piece

The fifth —a touching scene of war—is an abridgment of Acts IV and V of the Venisamhara compressed into one Here, too, the Prākrta portions are presented in their Samskrit forms

The sixth—the story of Marichi—is full of dramatic interest, literary beauty and practical instruction All indecorous references have been carefully expunged and in one instance I have taken the liberty to replace the omitted portion from a different scene in the same book for the sake of preserving continuity

The seventh—Sukanasa's advice to Chandrāpida—is a master piece of prose The piece has been taken unmutilated, with eliminations of only two small points that seemed to jar on the sense of decency

The eighth—the story of Mahasvetā—is rich in scenes of romantic interest The story appears in a slightly curtailed and modified form in the piece

A short notice of the authors I have drawn upon deserves a place in this connection

The first and foremost in order of contents comes Kalidasa Very little, authentically, is known of him beyond his authorship of the well known works

--the Raghuvamśa, the Kumārasambhava, the Meghaduta the Śakuntala, the Vikramorvaśiya, and the Mālavikāgnimitra excluding a few others of minor importance and questionable authenticity It is in the fitness of things that we should know little of the date and nativity of this 'immortal bard and 'world poet,' the universal character of whose works disavows all conventionalities of time and space Tradition, which is being gradually borne out by historical researches, makes him a native of Malava and a coeval of king Vikramāditya of Ujjayini (first century B C), as shown in the oft quoted lines —

धन्वन्तरि क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासा ।
ख्यातो वराहमिहिरो नृपते सभाया रत्नानि व वररुचिर्नव विक्रमस्य ॥

From Kalidasa's extensive knowledge of the Geography of the country as evidenced in his works--one would naturally infer that he was much travelled which is further confirmed by the tradition which lays the scene of his death in Ceylon This conclusively proves that ample facilities of communication were available in that far off age

Next in order comes Bhatta Nārāyana--the author of the Venisamhara He is one of the five Brahmans who came from Kanouj to Bengal in response to an invitation from Adisur the king to preside at a sacrifice solemnised by him in 732 A D, and settled there permanently at his desire Varaha, better known as Adi Varaha, was his eldest son

The third in order comes Dandin His eminence as a

poet may be inferred from the couplet—जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्। कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥

Three works are popularly attributed to Dandin (त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणा। त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुता॥) These three, possibly, are the Dasakumara charita, the Kavyadarśa and the Mallikamaruta The styles of the works would seem, however, to disprove their common authorship, though a weak defence might be sought in the fact that the style of a writer varies with age

The fourth in order is Bana He is the only one who has left us any record of what may come up to a personal history From the prefatory verses to his Kadambari and the introductory part of his Harsacharita we learn, among other particulars, that he sprang from the illustrious Vatsyayana family, that his father was named चित्रभानु, and his mother राज्यदेवी, that he lost his mother while a child and his father at the age of fourteen, and that his native place was a village called Pritikuta to the west of the Hiranyabhanu (modern Sona), not far from the capital of his patron King Harsa He flourished in the beginning of the 7th century A D Bana's eminence as a high class poet is testified to by the couplet—जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि। प्रागल्भ्यमधिकमाप्तु बाणी बाणे वभूवेति॥

The book with all my care could not be freed from errors The reader is requested to refer to the errata given at the end of the book before commencing his study

THE AUTHOR

अनुक्रमणिका ।

	विषयः		पत्राङ्कः
१.	रघु दिग्विजयः	(रघुवंशम्)	१
२.	रामचन्द्र-वनप्रत्यावर्तनम्	,,	६
३.	पार्वती-तपश्चर्या	(कुमारसम्भवम्)	१७
४.	प्रस्थानकौतुकम्	(शाकुन्तलम्)	३२
५.	दुर्योधन निर्वेदः	(वेणीसंहारम्)	४६
६.	मरीचि-वृत्तान्तः	(दशकुमारचरितम्)	७२
७.	चन्द्रापीडं प्रति शुकनासस्योपदेशः	(कादम्बरी)	७६
८.	महाश्वेता-वृत्तान्तः	(,,)	८३

अथपुष्पिका ।

" सत्यं शिवं सुन्दरम् । "

रघुदिग्विजयः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं यभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १ ॥
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
पुरुहूतध्वजस्येव तस्योच्छ्रयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३ ॥
क्रममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम् ॥ ४ ॥
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५ ॥
परिकल्पितसान्निध्या काले काले च चन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ॥ ७ ॥
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आवव्रे नातिशीतोष्णो नभस्यानिव दक्षिण ॥ ८ ॥
मन्द्रोत्कण्ठा. कृतास्तेन गुणाधिक्कतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजा ॥ ९ ॥
नयविद्भिर्नवे राज्ञि सदस्यश्चोपदर्शितम् ।
पूर्वं पक्षाभवत्पक्ष्मस्तस्मिन्नाभवदुत्तर. ॥ १० ॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥
लक्ष्मप्रशमनस्वस्थमेनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ॥ १४ ॥
निसृष्टलघुभिर्भैर्यैर्मुक्तघर्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः ॥ १५ ॥
चार्पिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥
पुण्डरीकातपत्रस्तं विकलत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप लक्ष्मियम् ॥ १७ ॥
प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८ ॥

हंसश्रेणिषु तारासु कुमुदेषु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९ ॥
इक्षुच्छायानिषादिभ्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥
प्रसादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्की चुक्षुभे द्विषतां मनः ॥ २१ ॥
मदोद्भवाः कपोलान्तः सरितां कूलमुद्रुजाः ।
लीलाजेलमनुप्राप्तुमदोद्वास्तस्य विक्रमम् ॥ २२ ॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहृताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३ ॥
सरितः कुर्वती गाधाः पथश्चारियालकर्दमान् ।
यात्रायै नोदयामास तं शरत् प्रथमं शरत् ॥ २४ ॥
तस्मै सम्यग् हुतो वह्निर्जिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्विजयाय ॥ २६ ॥
अवाकिरन् वयोवृद्धास्तं खाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥
स यौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
यद्दिनानिलोद्धूतैस्तज्जयसूचिभिः केतुभिः ॥ २८ ॥
रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ॥ २९ ॥
प्रतापोऽग्रे ततः शब्दः पश्चाद्रथगजस्वनः ।
यौ पश्चाद्वाहिनीति चतुरङ्गेव सा चमूः ॥ ३० ॥

मरुपृष्ठान्युदकभांसि नाव्याः सुप्रतरा नदाः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाद्यधिकारसंः ॥ ३१ ॥
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
यमौ हरजटाग्रथ्यां गङ्गामिव भगीरथः ॥ ३२ ॥
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपः ।
तस्यासीदुत्पथो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेयमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥
अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥
यङ्क्षानुत्क्षाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥ ३६ ॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥
स तीर्त्वा कपिशां सैन्यैरुद्वहद्भिरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥
प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तस्य रचितापानभूमयः ।
नारिकेलासवं योधाः शास्त्रवं च पपुर्यशः ॥ ४२ ॥

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥
ततो वेलातटैरेव फलवत्पूगमालिभिः ।
अगस्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥
यवैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मार्गचोदभ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६ ॥
सस्यज्जुरध्यचरणानामेलानामुरपतिष्णवः ।
लुलयागन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनभोगेषु चन्दनानां समर्पितम् ।
नोन्नसत् करिणां प्रैवं त्रिपदीच्छेदिनामपि ॥ ४८ ॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९ ॥
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ५० ॥
स निर्विश्य यथाकामं तटेष्वालोलचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५१ ॥
अलघ्यविक्रमः सह्यं दूरान्मुकुलमुद्वहन् ।
नितम्बमिव मेदिन्याः शस्तांशुकमलङ्घयत् ॥ ५२ ॥
प्रस्थानक्लेशविसर्पद्रिपवान्तजयोद्यतैः ।
रामास्तोलतरितोऽप्यासीत् सह्यलग्न इवार्णवः ॥ ५३ ॥
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥

मुरलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारणानामयत्नपटवासताम् ॥ ५५
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
घर्मभिः पवनोद्धूतराजतालीयनध्वनिः ॥ ५६ ॥
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ५७
अथकाशं किलोदन्वाग्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥
मरुद्भिरुद्गतोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तद्योधैर्जेयस्तम्भं चकार सः ॥ ५९ ॥
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥
संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविक्षेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥
अपनीतशिरस्त्राणा शैवालं शरणं ययुः ।
प्रणिपातप्रतीकार संरम्भो हि महात्मनाम् ॥ ६४
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥
तत. प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुत्तरकौरव्यानुद्धरिष्यन् रसानिव ॥ ६६ ॥

विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
धुधुर्वाजिन स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥ ६७ ॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
क्रपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥
काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैः खाण्डवनलाः ॥ ६९ ॥
तेषां सदश्वयुक्तानां रथिनां राजधानीषु ।
उपदा विविशुः शश्वत्तोरसेका कोशलेश्वरम् ॥ ७० ॥
ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
धैर्यस्खलित इव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
पयंस तुल्यमक्वानां सैन्यघोषेऽप्यसम्भ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२ ॥
भुजेषु मर्मरीभूता कौचकध्वनिहेतवः ।
गङ्गार्थाकारिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥
वेणुश्रमुनमेरूणां छायोच्चध्यास्य सैनिकाः ।
पेदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥
तरलासक्तमातङ्गग्रैवेयकरुतिर्तावधः ।
प्रासक्षोभभयो नेतुर्नकमस्नेहदीपिका; ॥ ७५ ॥
तस्योत्सृष्टनिवासेषु कटरज्जुच्युतत्वचः ।
गजघर्मं किरातेभ्य. शरांस्तुदैवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शैलसचलङ्कैतान् स कृत्वा विरतोत्सवान् ।
प्रयोदाहरणं चाह्नोर्गोपयामास किन्नरान् ॥ ७८ ॥

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
वासा हिमवतः स्वामी राज्ञ स्वारो हिमाद्रिणा ॥ ७६ ॥
तमाक्षोभ्यं यशोराशिं निवेश्यायरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥
चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥
न प्रसेहे स रुद्धार्कमधाराघंवुदिनम् ।
रघुवर्त्मरजोऽप्यस्य क्षुत एव पतार्किनीम् ॥ ८२ ॥
तमीशे. कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण च्छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्नासां छत्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८

सम्भावितं सचिवसखः पुरःसरयाभि-
गुर्वीभि शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान्स्वपुरनिवृत्तये ऽनुमेने ॥ ८७
ते रत्नाध्वजकुलिशातपत्रचिह्नं
लब्धाजश्चरणयुगं प्रसादलभ्यम् ।
मत्यानप्रणतिभिरङ्कुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

रामचन्द्रधनप्रत्यावर्तनम् ।

अथात्मन शब्दगुण गुणज्ञ पद विमानेन विगाहमान: ।
रत्नाकरं पौल्य मिव स जाया रामाभिधानो हरिरित्युवाच ॥१॥
वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ २ ॥
गुणैर्यियक्षो: कपिलेन मध्ये रसातल संक्रमिते तुरङ्गे ।
तदर्थमुर्वीमवदारयद्भि पूर्वै खिलायं परिखीकृतोन ॥ ३ ॥
गर्भं दधत्यर्कमरीचयोऽस्मादू विवृद्धिमत्राप्नुवते वसूनि ।
अन्विन्धनं यद्धिमसौ विभर्ति प्रह्लादन ज्योतिरजन्यलेन ॥ ४ ॥
तां तामवस्था प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।
पिण्डीरिवास्यानवधारणीयमौद्धत्यया रूपमियत्तया वा ॥ ५ ॥
नाभिप्रबद्धाम्बुरुहासनेन संस्तूयमान प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्र संहृत्य लोकान्पुरुषोऽधिशेते ॥६॥
पक्षच्छिदा गोत्रभिदात्तगन्धा शरण्यमेनं शतशो महीभा: ।
नृपा इवोपप्लविन परेत्यो धर्मोत्तर मध्यममाश्रयन्ते ॥ ७ ॥
रसातलादद्रिभिदेन पुसा भुव प्रयुक्तोद्धरणक्रियाया ।
अस्याब्जगर्भ प्रलयप्रवृद्धं मुहुर्तवक्त्रावरणं बभूव ॥ ८ ॥
मुखार्पणेषु प्रकृतिप्रगल्भा स्वयं तदङ्गाभरणादानदक्ष ।
अनन्यसामान्यकलत्रवृत्ति पिवत्यसौ पाययते च सिन्धू ॥९॥

सलक्ष्यमादाय नवीमुखाग्रम् सम्मीलयन्तो विवृताननत्वात् ।
अमी शिरोभिस्तिमय सरन्ध्रैरुर्ध्वं वितन्वन्ति जलप्रवाहान् ॥१०॥
मातङ्गनक्रै सहसोत्पतद्भिर्मीनान्हिना पश्य समुद्रफेनान् ।
कर्णोत्पलंसर्पितया य एषा व्रजन्ति कर्णत्वणचामरत्वम् ॥ ११ ॥
वेलानिलाय प्रसृता भुजङ्गा महोर्मिविस्फूर्जथुनिर्विशेषा ।
सूर्यांशुसम्पर्कसमृद्धरागैर्व्यंजय-त एते मणिभि फणस्थै ॥ १२ ॥
तयाधररूपधिंषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ।
ऊर्ध्वाङ्कुरस्रोतमुख कथञ्चित्क्रेशादपक्रामति वङ्गयूथम् ॥१३॥
प्रसूतमाश्रेण पयासि पातुमायतवेगाद् भ्रमता घनेन ।
आभाति भूयिष्ठमय समुद्र प्रमथ्यमाना गिरिणेव भूय ॥१४॥
सूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ॥१५॥
वेलानिल केतकरेणुभिन्ते सम्भावयत्याननमायताक्षि ।
मामद्य मद्यैर्मदनकालहालैर्वैदग्धीव बिम्बाधरबद्धतृष्णम् ॥ १६ ॥
एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटल पयोधे ।
प्राप्ता मुहूर्तेन विमानवेगात् कूल फलावर्जितपूगमालम् ॥१७॥
कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम् ।
एषा सिन्दूरीभवत समुद्गरलकानना निष्पततीव भूमि ॥१८॥
क्वचित्पथा सञ्चरते सुराणा क्वचिद् घनाना पतता क्वचिच्च ।
यथाविधौ मे मनसोऽभिलाष प्रवर्तते पश्य तथा विमानम् ॥
असौ महेन्द्रद्विपदानगन्धिस्रिमार्गगावीचिविमर्दशीत ।
आकाशवायुर्दिनपैवनोत्थानाचामति स्वदलवान्मुखे ते ॥२०॥
करेण घातायनलम्बितेन स्पृष्टस्त्वया चण्डि दुकूलहालिन्या ।
आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युल्लतयो घनस्ते ॥ २१ ॥

अमी जनस्थानमपोढविघ्न मत्वा समारब्धनवोदकानि ।
अध्यासते चारुभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥
सैषा स्थली यत्र निषिञ्चता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥२३॥
त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेता कृपया लता मे ।
अदर्शयन् वल्कुशकल्पवृक्ष्य शाखाभिरावर्जितपल्लवाभि ॥२४॥
मृगश्च दर्भाङ्कुरनिर्व्यपेक्षाल्लवाग्रतिक्त समवैक्षयन्माम् ।
व्यापारयन्त्यौ दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥
पतद्विमौक्तेयघन पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥२६॥
गन्धश्च भाषेऽनघलोलजानां वादक्रमज्ञौद्गलकेसराढ्य ।
लिङ्गाश्च केका शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे ॥
पूर्वानुभूत स्मरता च यत्र कृपोत्सवं भीरु तवोपगूढम् ।
मुहाविसारीण्यतिवाहितानि मया कथञ्चिद्दयितागतानि ॥२८॥
आसारसिक्तक्षितिवाष्पयोगान्नाम्नाक्षिणोद्यत्र निमेषकोशै ।
विद्रुम्यमाना नवकन्दलैस्ते विश्राम्यधूमाग्रलोचनश्री ॥२९॥
कपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि ।
दूरायतीर्णं पिबतीव वेदादम्भानि पम्पासलिलानि दृष्टि ॥३०॥
अथाविषुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।
ग्रन्थानि दूरान्तरवर्तिना दे मया प्रिये सस्मृदमीक्षितानि ॥३१॥
इमां तटाशोकलताञ्च लम्बां स्तनाभिरामस्तवनाभिनम्राम् ।
त्वमाशिषुद्या परिरब्धुकाम सौमित्रिणा साध्वमह निषिद्ध ॥
अभूविमानान्तरलम्बिनीना श्रुत्वा स्वन काञ्चनकिङ्किणीनाम् ।
मयूदमज्जन्तिव चमुखतन्त्यो गोदावरीसारसपङ्क्तयस्त्वाम् ॥३३॥

एषा त्वया पेशलमध्ययापि घटाम्बुसंवर्द्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णसारा हता चिरात्पञ्चवटी मनो मे॥३४॥
अथानुगोदं मृगयानिवृत्तस्तरङ्गघातेन विनीतखेद• ।
रहस्यदुत्सङ्गनिषण्णमूर्ध्वं स्मरामि वानीरगृहेषु सुप्त ॥३५॥
भ्रूभेदमात्रेण पदान्मयोन प्रह्लादयां यो नहुषं चकार ।
तस्याविलम्भ परिशुद्धिहेतोर्भीमो मुने स्थानपरिग्रहोऽयम् ॥
नेतोग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम् ।
ज्ञात्वा हविर्गन्धि रजोविमुक्त समश्नुते मे लघिमानमात्मा॥३७
एतन्मुनेर्मानिनि शालकर्णे पञ्चाप्सरो नाम विहारवापि ।
आभाति पर्यन्तवनं विदूरान्मेघान्तरालस्थमिवेन्दुबिम्बम् ॥३८॥
पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगै सार्द्धमृषिर्मधोना ।
समाधिभीतेन किलोपनीत पञ्चाप्सरोयौवनकूटबन्धम् ॥३९॥
तस्यायमन्तर्हितसौधभाज प्रसक्तसङ्गीतमृदङ्गघोष ।
वियद्गत पुष्पकचन्द्रशाला श्रवं प्रतिश्रुन्मुखतां करोति॥४०॥
हविर्भुजामध्वतां चतुर्णां मध्ये ललाटन्तपसस्तसूनि ।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्त ॥४१॥
अमुं सहासप्रहितैस्तृणानि व्याजाद्दसन्दर्शितमेखलानि ।
नालं विकर्तुं जनितेन्द्रशङ्का सुराङ्गनाविभ्रमचेष्टितानि ॥४२॥
एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलायम् ।
सभाजने मे भुजमूर्ध्ववाहु सव्येतर प्राध्वमित प्रयुङ्क्ते ॥४३॥
वाचंयमत्वात्प्रणतिं मगैष कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्ने ।
दर्भं विमानव्यवधानमुक्तां पुन सहस्रार्चिरपि सन्निधत्ते ॥४४॥
अद• शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्ने ।
चिराय सन्तर्प्य समिद्धिरग्नि यो मन्त्रपूतां तनुमप्यहौषीत् ॥

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसम्भाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥४५॥
धारास्खनोद्गारिदरीमुखोऽसौ श्रृङ्गाग्रलग्नाम्बुदवप्रपङ्क्तिः ।
यश्चाति मे बन्धुरगाधि चक्षुर्दन्तः ककुद्मानिव चित्रकूटः ॥४७॥
एषा प्रसन्नस्तिमितप्रवाहा सरिद् विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥४८॥
अयं सुजातोऽङ्गुलिरुं तमालैः प्रवालमादाय सुगन्धि यस्य ।
प्रवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ॥४९॥
अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात्फलबन्धवृत्तम् ।
वनं तपःसाधनमेतदेव विष्कम्भितोदग्रतरप्रभावम् ॥ ५० ॥
अद्याभिषेकाय तपोधनानां सर्षिंद्रहस्तोद्धृतहेमपद्माम् ।
प्रचक्रमे यामास किलानुसूया विस्रोतसं त्र्यम्बकमौलिमालाम् ॥
वीरासनैर्ध्यानजुषामृषीणाममी समाध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव याज्ञिनोऽपि ॥५२
यया पुरुत्वाय उपयाचितो यः सोऽयं घटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गाढतानां सपद्मरागः फलितो विभाति ॥५३॥
क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरन्तरिताऽन्तरेव ॥ ५४ ॥
क्वचित्प्रभानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥५५॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ ५६ ॥
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥५७॥

समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्यागयोगेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ॥५८
पुरं निषादाधिपतेरिदं तद् यस्मिन्मया मौलिमणिं विहाय ।
जटाभृतो वल्कलदर्भमुञ्जाः कैकेयि कामाः फलितास्तवेति॥५९॥
पयोधरैः पुण्यजनाङ्गनानां निर्घृष्टहेमाम्बुजरेणु यस्याः ।
प्रातः सरः कारणमासकाक्षो बुद्धेरिवाव्यक्तमुदाहरन्ति ॥६०॥
जलानि या तीरनिखातयूपा वहत्ययोध्यामनुराजधानीम् ।
तुरङ्गमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ ६१ ॥
यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् ।
सामान्यधात्रीमिव मानसं मे सम्भावयत्युत्तरकोशलानाम्॥६२॥
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ॥ ६३ ॥
विरक्तसन्ध्याकपिशं पुरस्ताद् यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः॥६४॥
अद्धा श्रियं पालितलङ्घनाय प्रत्यर्पयिष्यत्यनघां स साधुः ।
हृत्वा निवृत्ताय मृधे खरादीन् संरक्षितां रक्षसमेव लक्ष्मणो मे ॥
असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।
गृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥६६॥
पिता विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्गनितामभोक्ता ।
त्यक्ति चर्षीणि तया सहोज्झमभ्यस्यतीव व्रतमासिधारम्॥६७॥

पतायबुद्धयति दाशरथौ सदीया-
मिक्ष्वाकवो विमानमधिदेवतया चिन्तित्वा ।
ज्योतिष्पथाद्भवततार सविस्मयाभि-

तस्मात्पुर सचिवभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्त ।
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन राम ॥ ६९ ॥
इक्ष्वाकुवंशगुरवे प्रयत प्रणम्य
स भ्रातरं भरतमग्र्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ
तद्भक्तचपोढपितृराज्यमहाभिषेके ॥ ७० ॥
श्मश्रुप्रवृद्धिजनिताकृतिविक्रियाश्च
मल्लान्प्ररोहजटिलानिव मन्त्रिवृद्धान् ।
अन्वग्रहीत्प्रणमतः शुभदृष्टिपातै
र्वार्तानुयोगमधुराक्षरया च वाचा ॥ ७१ ॥
दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एव समरेषु पुर प्रहर्ता ।
इत्यादृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ ७२ ॥
सौमित्रिणा नवतु संससृजे स चैन-
मुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।
कण्ठेन्द्रजिन्महरणश्रमघर्मशान्त
क्ष्विण्णस्त्रिदाश्च भुजमध्यमुर स्थलेन ॥ ७३ ॥
रामालया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुराहरदुर्गजेन्द्रान् ।
तेषु त्वरस्तु बहुधा मदवारिधारा
शैलाधिरोहणसुखान्युपलेभिरे ते ॥ ७४ ॥

सानुस्मृव प्रभुरपि क्षणदाचराणां
भेजे रथान्वरथप्रभवानुशिष्टः ।
मायाविकल्पपरिचैरपि ये तदीयै
र्न स्यन्दनैस्खलितक्षनिमभक्तिशोभा ॥ ७५ ॥

भूयस्ततो रघुपतिर्वैलसत्पताक
मध्यास्त कामगति सावरजो विमानम् ।
द्योयातनं बुधबृहस्पतियोगदृश्य
स्तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ ७६ ॥

तत्रेश्वरेण जगतां प्रलयादिघोरां
चर्यात्ययेन रुचमभ्रघनादिवेन्दो ।
रामेण मैथिलसुतां दशकण्ठरुच्छ्रात्
प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ ७७ ॥

लङ्केश्वरप्रणतिभङ्गदृढव्रतं तद्
वन्द्यं युगं चरणयोर्जनकात्मजाया ।
ज्येष्ठानुधूसिजटिलं च शिरोऽस्य साधो-
रन्योन्यपावनमभूदुभयं समेत्य ॥ ७८ ॥

कोशाभं प्रकृतिपुरःसरेण गत्वा
कायुरस्थ स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्यमार्यं
साकेतोपवनमुदारमध्युवास ॥ ७९ ॥

पार्वती-तपश्चर्या ।

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
ध्रुवं स कार्यान्तरमुद्यतस्तया
समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥
निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वत्सलां
निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥
मनोषिता: सन्ति गृहेषु देवता
स्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात् ।
कठिनलार्थस्थिरनिश्चयं मनः
फलेन निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥

कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥ ६ ॥
अथागुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया
जगाम गौरीशिखरं शिखण्डिमत् ॥ ७ ॥
विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध वालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहतिं ॥ ८ ॥
यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूत्तदाननम् ।
न पट्टपद्मश्रियमेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥
प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार ताम् ।
अकारि तत्पूर्वनिबद्धया तया
स्वरागमय्या रशनागुणास्पदम् ॥ १० ॥
विसृष्टरागादधराच्च वर्तिलः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रग्रथनार्थया करः ॥ ११ ॥

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा साधुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ॥ १२ ॥
पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
ललाटु तन्वापु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥
अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तनप्रस्रवणैरवर्धयत् ।
गुहोऽपि येषां श्रयमाणजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥
श्रवण्यबीजाब्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः श्रुतूढलात्
पुरः सखीनामभिमीत लोचने ॥ १५ ॥
हुताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥
विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसम्भृतानिलं
तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

यदा फलं पूर्वतपःसमाधिना
न तावता लभ्यममंस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमादृतं
तपो महत्सा चरितुं प्रचक्रमे ॥ १८ ॥
क्षमं यथौ कन्दुकलीलयापि या
तया मुनीनां चरितं व्यगाहत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं
मृदु प्रकृत्या च सुकुमारमेव च ॥ १९ ॥
शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभा
. मनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥
दृशाभितप्तं सविधुरंशुमालिभि-
र्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम् ॥ २१ ॥
अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधि-
र्न वृत्तवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥
निकामतप्ता हविषेव वह्निना
नमश्चरेणेन्धनसम्भृतेन सा ।
तपाक्षये वारिभिरर्दिता नवै-
र्भुवा सहोष्माणमनुज्झदूर्ध्वगम् ॥ २३ ॥

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोभरोत्लेशनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥ २४ ॥
शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्निमिषैस्तडिन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥
निनाय सा यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा ।
परस्परक्रन्दिनि चक्रवाक्योः
पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥
मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मलम्पटां
मनोज्ञगन्धामिवाकरोदपाम् ॥ २७ ॥
स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
बभूव यामेव पुराविदः ॥ २८ ॥
मृणालिकापेलवमेवमादिभि-
र्व्रतैः क्षमद्भं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

अथाजिनाषाढधर प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा
विवेश काश्चिज्जटिलस्तपोवनं
शरीरबद्ध प्रथमाश्रमो यथा ॥ ३० ॥
तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भयान्ति साध्येऽपि निविष्टचेतसा
वपुर्विशेषेष्वतिगौरवा क्रिया. ॥ ३१ ॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमम् ॥ ३२ ॥
अपि क्रियार्थं सुलभ समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥
अपि त्वदायत्तमिवारिसम्भृतं
प्रवालमासामनुबन्धि धीरुधाम् ।
शिरोरुहैरालककपाटलैस्त ते
तुलां यदारोहति दन्तयासवा ॥ ३४ ॥
अपि प्रसन्नं हरिणेषु ते मन
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनै-
स्त्वयाविसाद्दश्यमिव प्रयुञ्जते ॥ ३५ ॥

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥
विकीर्णसप्तर्षिवलिप्रहासिभि-
स्तया न गाङ्गे सलिलेंदियश्च्युते ।
यथा त्वदीयैश्चरितैरलंकृते
महीधर पावित एष सान्वयः ॥ ३७ ॥
अनेन धर्मः सचिवोयमद्य मे
द्वितीयवान् प्रतिभाति भाविनि ।
त्वया मनो नियमयतैकगामिना
यदेक एव प्रतिगृह्य लभ्यते ॥ ३८ ॥
प्रयुक्तसत्कारविशेषमात्मना -
न मां परं सम्भावयितुमर्हसि ।
यतः सतां सङ्गतगामि सज्जनं
मनीषिभिः सामयदीनमुच्यते ॥ ३९ ॥
अतोऽत्र किञ्चिद् भयतो बहुक्षमां -
द्विजातिमादाद्युपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥
कुलं प्रसूतिः प्रथमस्य वेधसः-
खिलोकसौन्दर्यमिवोदितं वपुः ।
अमूल्यमैश्वर्यसुखं नवं वयः-
स्तप फलं स्यात् किमतः परं वद ॥ ४१ ॥

भवत्यनिष्टादपि नाम दुःसहा-
मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि त्वयि ॥ ४२ ॥
अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत्पन्नगरत्नसूचये ॥ ४३ ॥
किमित्यपाख्यामरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वदाशु देवे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥
दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥
निवेदितं नि ष्कसितेन सोन्मना
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥
अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते ।
उपैति ते यः श्रथलान्वितैर्जटैः
कपोलदेशे कलमाग्रपिङ्गलैः ॥ ४७ ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकरप्लुष्टविभूषणारुषदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ४८ ॥
अयं मे सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषां
न चक्रमारोपयमरालपक्ष्मणः ॥ ४९ ॥
कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्द्धभागेन लभस्व कांक्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥
इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो चयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥
सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव वेत्ति कुत्हलम् ।
यदर्थमभ्योज्झितविष्टपत्रयं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥
इयं महेन्द्रप्रभृतीनधिश्रियः
श्रुतर्षिगोशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥

असह्यहुङ्कारनिवर्तित पुरा
पुरारिमप्राप्तमुख. शिलीमुखः ।
रमां हृदि व्यायतपातमार्च्छणोद्
विशीर्णमूर्तेरपि पुष्पधन्वन. ॥ ५४ ॥
तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभत स्म निर्वृतिं
तुषारसंघातशिलातलेष्वपि ॥ ५५ ॥
उपात्तवर्णे चरिते पिनाकिन·
सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशा किन्नरराजकन्यका
घनान्तसंङ्गीतसखीररोदयत् ॥ ५६ ॥
त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यया-
गसत्यकण्ठार्पितबाहुबन्धन. ॥ ५७ ॥
यदा बुधैः खेचरसुन्दरीभ्यस्
त्वयुच्यसे न घटित भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखर ॥ ५८ ॥
यदा च तस्याभिगमे जगत्पते·
रपश्यद·यं न विधि विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्या शशिमौलिसंश्रय ॥ ६० ॥
न वेद्मि सा प्रार्थितदुर्लभं कदा
सखीभिरुक्ता परमीप्सितामिमाम् ।
तपः कृशामभ्युपपत्स्यते सखीं
धृवेव सीता तदवग्रहक्षताम् ॥ ६१ ॥
अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिक सुन्दरस्तया ।
अयं दमेवं परिहास इत्युमा-
मपृच्छदभ्यञ्जितहर्षलक्षण ॥ ६२ ॥
अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्तीं स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवाग्भमाषत ॥ ६३ ॥
यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चै पदलङ्घनोत्सुक ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥
अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं च न कर्तुमुत्सहे ॥ ६५ ॥

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमाघट्टनम् ॥ ६६ ॥
त्वमेव तावत् परिचिन्तयेदृशं
कदाचिदेते यदि योगमर्हतः ।
वधूयुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुचर्चितं च ॥ ६७ ॥
चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥
अयुक्तरूपं किमतः परं वद
स्निग्धेक्षणश्चेत् सुलभं तथापि यत् ।
इतश्चितेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥
इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
सदाजनः कौतुकमेदुरो भविष्यति ॥ ७० ॥
इयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥
निवर्तयास्मादसदीप्सितान्मन
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥ ७३ ॥
इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥
उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
हिनन्ति मन्दाश्चरितं महात्मनाम् ॥ ७५ ॥
विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिष. सत.
किमेभिराशोपहतात्मवृत्तिभि. ॥ ७६ ॥
अकिञ्चन सन् प्रभव. स सम्पदां
त्रिलोकनाथ पितृसद्मगोचर. ।
स भीमरूप. शिव इत्युदीर्यते
न सन्ति याथार्थ्यविद. पिनाकिन. ॥ ७७ ॥

विभूषणोद्भासि विनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥
तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युतं
स्त्रियैकमीशं प्रति साधु भाषितम्
यमाप्तनन्यारमभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥
अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
मनस्तु भावैकरसं स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥
विचार्यतामार्ति किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥ ८

इतो गमिष्यास्यथवेति वादिनी
चचाल बाला स्तनभिन्नचल्कला ।
स्वरूपमास्थाय च तां स्मितस्मिताः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥
अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां बिभर्त्ति ॥ ८६ ॥

प्रस्थानकौतुकम् ।

(अथ प्रविशतः कुसुमावचय नाटयन्त्यौ सख्यौ ।)

अनसूया—प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपमर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं तथाप्येतावच्चिन्तनीयम् ।

प्रियंवदा—कथमिव ।

अनसूया—अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसृष्ट आत्मनो नगरं प्रविश्यान्त पुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति ।

प्रियंवदा—विस्रब्धा भव । न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति । तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति ।

अनसूया—यथाहं पश्यामि तथा तस्यानुमतं भवेत् ।

प्रियंवदा—कथमिव ।

अनसूया—गुणवते कन्यका प्रतिपादनीयेति प्रथम. सङ्कल्पः । तं यदि दैवमेव सम्पादयति नन्वनायासेन कृतार्थो गुरुजनः ।

प्रियंवदा—(पुष्पभाजनं विलोक्य) सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि ।

(तत प्रविशति सुस्थोत्थित शिष्य ।)

शिष्य—चेटीपलक्षणार्थमादिष्टोऽस्मि तन्नभवता प्रवासादु पावृतेन काश्यपेन। प्रकाश निर्गतस्तावदवलोकयामि किमद्यावशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथा हि।

यात्येकतोऽस्तशिखरं पतिरोषधीना-
आविष्कृतोऽरुणपुर सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥ २ ॥

अपि च—

एताहिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रमुदु भवन्ति ॥ ३ ॥

अपि च—

कर्कन्धूनामुपरि तुहिनं रञ्जयत्यम्रसन्ध्या
दामन्नुच्चैर्मुकुलपटलं पीतनिद्रो मयूरः ।
वेदिप्रान्तप्रणयिसलिलाद्गौरिवानन्यदैव सद्यः
पत्वाङ्कं भजति रविदुःखानुबद्धच्छविर्नः ॥ ४ ॥

(प्रविश्याकाशे)

सूत्रधार—अयि सखि विजयवर्मणो जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।

शिष्य—यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (निष्क्रान्त)

अनसूया—प्रतिबुद्धापि किं करिष्यामि। न मे उचितेष्वपि निजकरणीयेषु हस्तपादं प्रसरति। काम हृदयं सकामो भवतु येनाभ्यर्थनीये जने शुद्धदृग सखी पदं करिता।

अथवा दुर्वाससः शाप एव विकारयति । अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावतः कालस्य लेखमात्रमपि न विसर्जयति । (विचिन्त्य) तदितोऽभिज्ञानमङ्गुलीयकं तस्मै विसृजामः । दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम् । ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम् । इत्यंगतेऽस्माभिः किं करणीयम् ।

(प्रविश्य) प्रियंवदा—(सहर्षम्) सखि, त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम् ।

अनसूया—सखि, कथमेतत् ।

प्रियंवदा—शृणु । इदानीं सुखशयितप्रच्छिकां[२] शकुन्तलां सकाशं गताऽस्मि ।

अनसूया—ततस्ततः ।

प्रियंवदा—तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेन एवमभिनन्दितम् दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता । यत्ते, सुशिष्यपरिग्रहेव विद्या अशोचनीयासि संवृत्ता । अद्यैव ऋषिप्रतिष्ठितां त्वां भर्तुः सकाशं विसर्जयामि' इति ।

अनसूया—अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः ।

प्रियंवदा—अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाचा ।

अनसूया—सविस्मयम् । कथय ।

प्रियंवदा—दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ५ ॥

अनसूया—(प्रियंवदामाश्लिष्य) सखि, प्रियं मे प्रियं मे । किमन्यदेव शकुन्तला नीयते इत्युत्कण्ठासाधारणं परि

प्रियंवदा—सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः । सा तपस्विनी निर्वृता भवतु ।

अनसूया—तेन हि एतस्मिंश्चूतशाखावलम्बिते नारिकेलमुद्गके एतन्निमित्तमेव कालान्तरक्षमा निर्दिसा मया केसरमालिका । तदिमां हस्तसन्निहितां कुरु । यावदहमपि मृगशिशुना तीर्थमृत्तिका दूर्वांकिसलयानाति मङ्गल-समालम्भनानि विरचयामि ।

प्रियंवदा—तथा क्रियताम् ।

(अनसूया निष्क्रान्ता । प्रियंवदा नाट्येन सुमनसो गृह्णाति ।)

(नेपथ्ये)—गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः गच्छन्त-लानयनाय ।

प्रियंवदा—(कर्णं दत्त्वा) अनसूये, त्वरस्व त्वरस्व । एते खलु हस्तिनापुरगामिन ऋषय आकार्यन्ते ।

(प्रविश्य समालम्भनहस्ता अनसूया—सखि, एहि गच्छावः ।

(परिक्रामतः ।)

प्रियंवदा—(विलोक्य) एषा सूर्योदय एव शिखामञ्जिता प्रतीष्टनीवारहस्ताभि स्वस्तिवाचनिकामिस्तापसीभिर-भिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एनाम् ।

(उपसर्पतः ।)

(ततः प्रविशति यथोद्दिष्टव्यापाराऽऽसनस्था शकुन्तला ।)

(शकुन्तलां प्रति) तापसीनामन्यतमा—जाते, भर्तुर्बहुमान-सूचकं महादेवीशब्दं लभस्व ।

द्वितीया—वत्से, वीरप्रसविनी भव ।

तृतीया—वत्से, भर्तुर्बहुमता भव ।

(आशिषो दत्त्वा गौतमीसहिताः निष्क्रान्ताः ।)

सख्यौ—(उपसृत्य) सखि, सुखमज्जनं ते भवतु ।

शकुन्तला—स्वागतं ते सखीभ्याम् । इतो निषीदतम् ।

सख्यौ—(मङ्गलपात्राण्यादायोपविश्य) सखि, सज्जा भव यावन्मङ्गलसमालम्भनं विरचयाव ।

शकुन्तला—इदमपि चहु मन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यति । (बाष्पं विसृजति ।)

सख्यौ—सखि, उचितं न ते मङ्गलकाले रोदितुम् । (अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः ।

प्रियंवदा—आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विम्रकार्यते ।

(प्रविश्योपायनहस्तौ) ऋषिकुमारकौ—इदमलङ्करणम् । अलङ्क्रियतामनघवती । (सर्वा विलोक्य विस्मिता ।)

गौतमी—वत्स नारद कुत एतत् ।

प्रथम—तातकाश्यपप्रभावात् ।

गौतमी—किं मानसी सिद्धि ।

द्वितीय—न खलु । श्रूयताम् । तदभवता वयमाज्ञप्ता शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरत' इति । तत इदानीम्—

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतक्षरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दत्तान्याभरणानि तरुकिसलयोद्भेदप्रतिद्वन्द्विभिः ॥६॥

प्रियंवदा—(शकुन्तलां विलोक्य) हला, अनयाऽभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीः । (शकुन्तला व्रीडां रूपयति ।)

प्रथमः—गौतम, पहोह्यभिषवकोष्णीर्णाय काश्यपाय वनस्पतिसेवां निवेदयाव ।

द्वितीय.—तथा । (निष्क्रान्तौ ।)

सख्यौ—अये अनुपभुक्तभूषणोऽयं जन । चिरकर्मपरिचये नाङ्गेषु ते आभरणविनियोगं कुर्म. ।
शकुन्तला—जाने वां नैपुणम । अमे गाढ्येनालङ्कृत ।

(तत प्रविशति स्नानोत्तीर्ण काश्यप ।)

काश्यप —

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठ स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकस
पीड्यन्ते गृहिण कथ नु तनयाविश्लेषदुःखैर्नवै ॥ ७ ॥

(परिक्रामति ।)

सख्यौ—हला शकुन्तले अवनिनमण्डनासि । परिधेहि सामप्रतं क्षौमयुगलम । शकुन्तला उ थाय परिधत्ते ।)

गौतमी—जाते एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वज मान इव गुरुरुपस्थित । आचार तावत् प्रतिपद्यस्व ।

शकुन्तला—(सलज्जम्) तात वन्दे ।

काश्यप —ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
पुतं त्वमपि सम्राज सेव पूरमवाप्नुहि ॥ ८ ॥

गौतमी—भगवन्, वर: खलदेय न आशी ।

काश्यप —वत्से, इत सद्योहुनानग्नीन् प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति ।)

काश्यप:—(ऋक्छन्दसाऽऽशास्ते)

अग्नौ वेदि परित कल्पसिध्वया
समिद्धन्त प्राक्लसंस्तीर्णदर्भा ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वह्नय पावयन्तु ॥ ९ ॥

प्रतिष्ठस्वेदानीम । (उदाष्टिक्षेपम) क ते शार्ङ्गरवमिश्रा ।

(प्रविश्य) शिष्यः—भगवन्, इमे स्मः ।

काश्यपः—भगिन्याहते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती । (सर्वे परिक्रामन्ति ।)

काश्यपः—भो भोः सन्निहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ १० ॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमीदृशात्मनः ॥ ११ ॥

(आकाशे)—

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ १२ ॥

(सर्वे सविस्मयमाकर्णयन्ति ।)

गौतमी—जाते, शकुन्तलानिर्विशेषाभिरनुमतगमनाभिः तपोवनदेवताभिः । प्रणम भगवतीः ।

शकुन्तला—(सप्रणामं परिक्रम्य—जनान्तिकम्) सखि प्रियंवदे, नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

प्रियंवदा—न केवलं तपोवनविरहकातरा सख्येव । त्वया उपस्थितवियोगस्य तपोवनस्याप्यवस्थां पश्य तावत् ।

उद्गलितदर्भकवला मृगी परित्यक्तनर्तना शिखिनी ।
अपसृतपाण्डुपत्रा मुञ्चत्यश्रूणि च व्रततिः ॥

शकुन्तला—(स्मृत्वा) तात लतामगिनीं वनज्योत्स्ना तावदामन्त्रयिष्ये ।

काश्यप —अवैमि ते तस्या सादर्यास्नेहम् । इय तावद् दक्षिणेन ।

शकुन्तला—(उपेत्य लतामालिङ्ग्य) वनज्यो स्ने चूतसङ्गतापि मा प्रत्यालिङ्ग इतोगताभि शाखाबाहुभि । अथप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि ।

काश्यप सङ्कल्पित प्रथममेव मया तवार्थे
भर्तारमात्मसदृश सुहृतैर्गता त्वम् ।
चूतेन सस्थितवती नवमालिकेय
मस्यामह ‹यि च सम्मति योतयन्त ॥ १३ ॥
इत पन्थान प्रतिपद्यस्व ।

शकुन्तला—(सख्यौ प्रति) हला एषा द्वयोर्युवयोर्हस्ते निक्षेप । सख्यौ—अय जा कस्य हस्ते समर्पित । वाष्प विहरत ।)

काश्यप —अनसूये प्रियवद अल गदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला । (सर्वे परिक्रामन्ति ।)

शकुन्तला—तात एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृग वधूर्यदा अनघप्रसवा भवति तदा मे कमपि प्रियनिवेद यितार विसर्जयिष्यथ ।

काश्यप —तद विस्मरिष्याम ।

शकुन्तला— गतिभङ्ग रुषि वा) का नु खल्वेष निवसने मे सजति । (परावर्तते ।)

काश्यप —वत्से
यस्य त्वया व्रणविरोपणमिङ्गुदीना
तैल न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽय न पुत्रकृतक पदवीं मृगस्ते ॥ १४ ॥

शकुन्तला—वत्से, किं सहचरपरित्यागिनीं मामनुसरसि ।
अचिरप्रसूतया जनन्या विना विवर्द्धित एव । इदानीमपि
मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।
(रुदती प्रस्थिता ।)

काश्यपः—वत्से, अलं रुदितेन । स्थिरा भव । इतः पन्थानमालोकय ।

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्ति
बाष्पं कुरु स्थिरतया विहृतानुबन्धम् ।
अस्मिन्मलक्षितनतोन्नतभूमिभागे
मार्गं पदानि खलु ते विषमीभवन्ति ॥ १५ ॥

शार्ङ्गरवः—भगवन् औदकान्ते स्निग्धो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम् । अत्र सन्दिश्य प्रतिगन्तुमर्हसि ।

काश्यप—तेन हि इमां शीघ्रवृक्षच्छायामाश्रयाम. ।
(सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—(आत्मगतम्) किं नु खलु नश्चमनो दुष्यन्तस्य युक्तरूपमस्मासु सन्देहपदम् । चिन्तयामि ।)

शकुन्तला—(जनान्तिकम् हला, नेक्षस्व । नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरटति । दुष्करमहं करोमि ।

अनसूया—सखि, मा एवं मन्त्रयस्व ।
इयमपि कान्तेन विना गमयति रजनीं विषाददीर्घतराम्
गुर्वीमपि विरहार्तामाशावन्धो विपादयति ॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरव.—आज्ञापयतु भवान् ।

काश्यपः—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यस्याः कथमप्ययान्धवकृतां स्नेहप्रवृत्तिञ्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १७ ॥

शार्ङ्गरवः—गृहीतं सन्देशं ।

काश्यपः—वत्से, त्वामिदानीमनुशासनीयास्मि । वनौकसोऽपि
सन्तो लौकिकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमित पतिकुलं प्राप्य
शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१८॥

कथं वा गौतमी मन्यते ।

गौतमी—पतिवान् वधूजनस्योपदेशः । जाने, एतत् खलु
सर्वमवधार्य ।

काश्यपः—वत्से, परिष्वजस्व मां सखीजनञ्च ।

शकुन्तला—तात, इत एव किं प्रियंवदानसूया सख्यौ लिख
लिप्येते ।

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् ।
त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमादिश्य) कथमिदानीं तातस्याङ्गात्प-
रिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं
धारयिष्यामि ।

काश्यपः—वत्से, किमेव कातरासि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥१९॥
(शकुन्तला पितुः पादयो पतति।)

काश्यप—यदिच्छामि ते तदस्तु।

शकुन्तला—(सख्यावुपेत्य) हला, द्वे अपि मां सममेव परिष्वजेयाम्।

सख्यौ—तथा कृत्वा) सखि, यदि नाम स राजा प्रत्याभिज्ञानमन्थरो भवेत् ततस्तस्मै इदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।

शकुन्तला—अनेन सन्देहेन धामाकम्पितास्मि।

सख्यौ—मा बिभीहि। स्नेह पापशङ्की।

गार्ङ्गरवः—युगान्तरमारूढः सविता। त्वरतामत्रभवती।

शकुन्तला—(आश्रममभिमुखी स्थित्वा) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये।

काश्यपः—श्रूयताम्।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥२०॥

गौतमी—जाते, परिहीयते गमनवेला। निवर्तय पितरम्।
अथवा चिरेणापि पुनः पुनरेषा एवं मन्त्रयिष्यते।
निवर्ततां भवान्।

काश्यपः—वत्से, उपस्थ्यते तपोऽनुष्ठानम्।

शकुन्तला—(भूय पितरमाश्लिष्य) तपश्चरणकृशं तातशरीरम् । तन्माऽतिमात्रं मम कृते उत्कण्ठस्व ।

काश्यप—(सनिःश्वासम्)

शममेष्यति मम शोक कथं नु वत्से त्वया रचितपूर्वम् ।
उत्सङ्गादिव विरुढं नीवारबलिं विलोकयत ॥ २१ ॥

गच्छ । शिवास्ते पन्थान सन्तु ।

निष्क्रान्ता शकुन्तला सहयायिनश्च ।

सख्यौ—(शकुन्तला विलोक्य) हा धिक, हा धिक् । अन्तरिता शकुन्तला वनराज्या ।

काश्यप— सनिःश्वासम्) अनसूये, प्रियवदे, गता वां सह धर्मचारिणी । निगृह्य शोकमनुगच्छतं माम् ।

सर्वे प्रस्थिता ।)

उभे—तात, शकुन्तलाविरहित शून्यमिव तपोवनं भविष्यति ।

काश्यप.—स्नेहप्रवृत्तिरेवदर्शिनी । सविमर्शं परिजन्य हन्त भो शकुन्तला पतिकुल विसृज्य लब्धमिदानीं स्वास्थ्यम् । श्रुत ।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशद प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥२२॥

(निष्क्रान्ता सर्वे ।)

दुर्योधन-निर्वेदः ।

(अथ प्रविशति प्रहारमूर्च्छित रथेन दुर्योधनमपहरन् सूत. ।)

सूतः—(ससम्भ्रमं परिक्रम्यावलोक्य च) अये, अयमसौ सरसीतीरजनितोलनसुरभिशीतलमातरिश्वसंवाहितसान्द्रकिसलयो न्यग्रोधपादप. । उचिता विश्रामभूमिरियं समरव्यापारखिन्नस्य धीरजनस्य । अत्र स्थितश्छायाचितालवृन्तेन हरिचन्दनच्छटाशीतलेनाम्बरनसुरभिणा दशार्णपरिणामयोग्येन सरसीसमीरणेनामुना गतक्लमो भविष्यति महाराजः । लूनकेतुश्छायं रथोऽनिवारित एव प्रवेक्ष्यति छायाम् । (प्रकाशं रूपयित्वा राजानमवलोक्य) कथमद्यापि चेतनतां न लभते महाराजः । भोः कष्टम् । (निःश्वस्य)

मदकलितकरेणुभज्यमाने
विपिने इव प्रकटैकशालयोधे ।
हतकलकुमारके कुलेऽस्मि-
स्त्वमपि विधेरवलोकितः कटाक्षैः ॥ १ ॥

(आकाशे लब्धं दत्त्वा) ननु भो हतविधे, भरतकुलविमुख.
अज्ञातस्य गदापौरुषाऽवज्ञस्य संशयम् ।
एषापि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया ॥ २ ॥

दुर्योधनः—(सानेकपलब्धसंज्ञः) आ. शक्किरस्ति दुरात्मनो वृकोदरस्य कृतकस्य मयि जीवति दुर्योधने प्रतिज्ञां पूरयितुम् । वत्स दुःशासन, न भेतव्यं न भेतव्यम् । अयमहमागतोऽस्मि । ननु सूत, प्रापय रथं तामेवोद्देशं यत्र वत्सो मे दुःशासन. ।

सूत —आयुष्मन्, यत्तमा सम्प्रति वाहारुते रथमुद्वोढुम् ।
(अपवार्य) मनोरथं च ।
दुर्योधन (रथाद्वतीर्य सगर्वं साकूतं च) कृतं रथन्दनगमनकालातिपातेन ।
सूत —(सवैलक्ष्यमकरणं च) मर्षयत्वायुष्मान् ।
दुर्योधन —धिक् सूत, किं रथेन । केवलमरातिविमर्दसंघट्टसंचारी दुर्योधन खलनम् । तद्गदामात्रसहाय. समभुवमवतरामि ।
सूत —आयुष्मन् एवमेतत् ।
दुर्योधन —यद्येवं किमेवं भावे । पश्य ।

बालस्य मे प्रकृतिदुर्ललितस्य पाप
पाप व्यवस्यति समक्षमुदायुधोऽसौ ।
अस्मिन्निवार्यसि किं यदलायिन मा
कोधो न वापि करुणा न च तेऽस्ति लज्जा ॥३॥

सूत —(रुक्ष्य पादयोर्निपत्य) प्रसीदतु प्रसीदतु आयुष्मान् । आयुष्मन्, संपूर्णप्रतिज्ञेन निगृहीतमरिबलमिदानीं दुरात्मना वृकोदरेण । प्रसीदतु तावत् ।
दुर्योधन —(सहसा भूमौ पतन् हा तात दुःशासन, हा मम जगतीमण्डलाभरणभूते निकषैवतस, हा मदङ्क-कुलललित हा सगरनिकुलगजघटाशूरेन्द्र, हा युवराज, कर्णादि । प्रयच्छ मे प्रतिवचनम् । (मोहमुपगत ।)
सूत —राजन् समाश्वसिहि समाश्वसिहि ।
दुर्योधन —(संज्ञा लब्ध्वा निश्चस्य)

युक्तं यथेष्टमुपभोगसुखेन नेत्र
हृत्वा क्षितिं क्षितिपतिर्पि हि मया न चूर्णाम्लेन ।
अस्मैरस्तु खलु नाम रिपुरहं विपक्षे-
यैतावतीमवनिमल्पं न च रक्षितोऽसि ॥४॥ (पतति ।)

सूतः—आयुष्मन्, समाश्वसिहि समाश्वसिहि ।
दुर्योधनः—धिक् सूत, किमनुष्ठितं भवता ।

रक्षणीयेन सततं बालेनाज्ञानुवर्तिना ।
दुःशासनेन भ्रात्राहमुपहारेण रक्षित ॥ ५ ॥

सूत—देव, मर्मभेदिभिरिषुतोमरशक्तिप्रासवर्षैर्महारथानाम-
प्रहतचेतनत्वान्निश्चेतन. कृतो महाराज इत्यपहृतो
मया रथः ।

दुर्योधनः—सूत, विरूपं कृतवानसि ।

तस्यैव पाण्डवपशोरनुजाधमो मे
त्वोर्भोगदाभिकृतेन विरोधितोऽस्मि ।
तेनैव नाभिशयितो रुधिरार्द्रशय्यां
दौःशासनो यदहमाशु वृकोदरो वा ॥ ६ ॥

(निःश्वस्य नभो विलोक्य) ननु भो हतबन्धवे, कृपावि-
रहित, भरतकुलविमुख,

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः ।

सूत.—शान्तं पापं शान्तं पापम् । महाराज किमिदम् ।

दुर्योधन—आतिलोपपरम्परोर्मे किं राज्येन जयेन वा ॥ ७ ॥

(ततः प्रविशति शरप्रहारव्रणानद्धपट्टिकालंकृतकाय सुन्दरकः ।)

सुन्दरक—आर्यः, अपि नामास्मिन्नुदन्वति सारथिद्वितीयो
दृष्टो युष्माभिर्महाराजदुर्योधनो न वेति । (निरूप्य) कथं
न कोऽपि मन्यते । भवतु । परेषां बद्धपरिकराणां
पुरुषाणां समूहो दृश्यते । अत्र गत्वा प्रदर्शयामि । (परिक्र-
म्य विलोक्य च) कथमेते खलु स्वामिनो गाढप्रहारहतस्य
घनसन्नाहजालदुर्भेद्यमुखेः कङ्कपत्रैर्हृदयाच्छल्यान्मुद्ध
रन्ति । तत्र खल्वेते जानन्ति । भवतु । अन्यतो विचेष्या
मि । (अग्रतोऽवलोक्य किञ्चित्परिक्रम्य) इमे खल्वपरे

प्रभूततरैः संगता वीरमनुष्या दृश्यन्ते । तत्र गत्वा प्रहरामि । (उपगम्य) हंहो, जानीथ यूयं कस्मिन्नुद्देशे कुरुनाथो वर्तते इति । कथमेतेऽपि मां प्रेक्ष्याधिकतरं रुदन्ति । तत्र खल्वेतेऽपि जानन्ति । (दृष्ट्वा) हा, अति-करुणं खल्वत्र वर्तते । एषा वीरमाता स्वमरणनिहतं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया समग्रभूषणया वध्वा सहानुम्रियते । (सश्लाघम्) साधु वीरमातः, साधु । अन्यस्मिन्नपि जन्मान्तरेऽनिहतपुत्रका भविष्यसि । भवतु । अन्यत्र प्रहरामि । (अन्यतो विलोक्य) अयमपरो बहु-प्रहारनिहतकायोऽक्षतव्रणवन्च एव योधसमूह इमं शून्यासनं तुरङ्गममुपालक्ष्य रोदिति । नूनमेतेषामप्येव स्वामी व्यापादितः । तत्र खल्वेतेऽपि जानन्ति । भवतु । अन्यतो गत्वा प्रहरामि । (सर्वतो विलोक्य) कथं सर्वं क्षयावस्थानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जन । तत्कोमिदानीमत्र प्रहरामि । कं वोपालप्स्ये । भवतु । स्वयमेवात्र विचेष्यामि । (परिक्रम्य) भवतु । दैवमिदानीमुपालप्स्ये । हंहो दैव एकादशानाम् चौहिणीनां नाथो ज्येष्ठो भ्रातुश्वशुरस्य मतौ गाङ्गेयद्रौणा-ङ्गराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य स-कलपृथ्वीमण्डलैकनाथो महाराजदुर्योधनोऽभ्यर्च्यते । अभ्यर्च्यमाणोऽपि न ज्ञायते कस्मिन्नुद्देशे वर्तत इति । (विचिन्त्य निःश्वस्य च) अथवा किमत्र दैवमुपालभे । तस्य खलिदं निर्भेत्सितविदुरवचनबीजस्यावधीरित-पितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढमू-लस्य जतुगृहद्यूतविप्रलापिनः संभूतचिरकालसंवर्धितस्य सधालस्य पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति । (अन्यतो विलोक्य) यथाश्रेष्ठं विविधरत्नप्रभासंधौत

सूर्यांकरणप्रसृताशङ्कचापसदृक्षसम्पूरितदशदिशामुखोल्-
मकेतुसंज्ञो रथो दृश्यते तदहं तर्कयाम्यवश्यमेतेन महा
राजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । यावदिक
षयामि । (उपगम्य दृष्ट्वा निःश्वस्य च) कथमेकादश-
नामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधनः प्राकृ
तपुरुष इवाश्लाघनीयायां भूमावुपविष्टस्तिष्ठति । अथवा
तस्य खल्विदं पाञ्चालीकेशग्रहकुसुमस्य फलं परिण
मति । (उपसृत्य सूतं संज्ञया पृच्छति ।)

सूतः—(दृष्ट्वा) अये, कथं संग्रामात्सुन्दरकः प्राप्तः ।

सुन्दरकः—(उपगम्य) जयतु जयतु महाराजः ।

दुर्योधनः—(विलोक्य) अये सुन्दरक, कच्चित्कुशलमङ्ग-
राजस्य ।

सुन्दरकः—देव, कुशलं शरीरमात्रकेण ।

दुर्योधनः—किं किरीटिनास्य निहतो धौरेया हतः सारथि
र्भग्नो वा रथ ।

सुन्दरकः—देव, न भग्नो रथः । अस्य मनोरथः ।

दुर्योधनः—किमविस्पष्टकथितैराकुलमपि पर्याकुलयसि मे
हृदयम् । तदलं संभ्रमेण । अशंसनो विस्पष्टं कथ्यताम् ।

सुन्दरकः—यदेव आज्ञापयति । देवस्य मुकुटमणिप्रभावेणा
धीता मे रणप्रहारवेदना । (साटोपं परिक्रम्य)
शृणोतु देव । अक्लीबानां कुमारदुःशासनवध (इत्यर्धोक्ते
मुखमाच्छाद्य शङ्कां नाटयति ।)

सूतः—सुन्दरक कथय । कथितमेव देवेन ।

दुर्योधनः—श्रूयताम् । श्रुतमस्माभिः ।

सुन्दरकः—(स्वगतम्) कथं दुःशासनवधः श्रुतो देवेन ।
(प्रकाशम्) शृणोतु देवः । अद्य तावत्कुमारदुःशासन-
वधामर्षितेन सव्यसाचिना क्रोधकुटिलभ्रुकुटीभङ्ग-

भीषणललाटपट्टेनाविर्भूतसन्त्रासभीषणमोक्षनिर्दिसशर-
धारायर्षिणाभिमुक्त- स्त्र दुराचारो दु शासनवैरी मध्यम-
पाण्डव. ।

उभौ—ततस्ततः ।

सुन्दरक.—ततो देव, उभयबलमिलदीप्यमानकरितुरगपदा-
तिसमुद्भूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च वि-
स्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम् । न खलु गग-
नतलं लक्ष्यते ।

उभौ—ततस्तत ।

सुन्दरक —ततो देव, दूराकृष्टधनुर्गुणाच्छोटनटङ्कारेण गर्भी-
रभीषणेन क्षायतं गर्जितं प्रलयजलधरोति ।

दुर्योधन —ततस्तत. ।

सुन्दरक —ततो देव उरोवि तयोरन्योन्यस्खलनादगर्जित
पिशुनं विविधपरिमुक्तप्रहरणाहतकवचभंगनिर्गतज्वलनवि-
स्फुल्लिङ्गमालाकुलं गम्भीरस्तनितचापजलधरं प्रसरच्छरधा
रासङ्घट्टवर्षि जातं समरदुर्दिनम् ।

दुर्योधन.—ततस्तत ।

सुन्दरक ततो देव, एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातु परिभव-
शङ्कितो धनञ्जयेन ज्ञातिमांसनिर्मोचविगलितध्वजाग्र
स्थितमहावानरस्तुरङ्गनर्मगाहनव्यापृतगाण्डीवराङ्कचका-
रितगदालाञ्छितबाहुदण्ड —पूर्वोत्तपाशजन्यदेवदत्त-
ताडनसंजातभिन्नदरविद्यापुञ्जकुटरो धावितस्तयु-

सारथिकस्तं देशमुपगतः कुमारवृषसेनः ।

दुर्योधनः—(सावष्टम्भम्) ततस्तत. ।

सुन्दरकः—ततश्च देव, तेनागच्छतैव कुमारवृषसेनेन विदलितासिलताश्यामलस्निग्धपुङ्खैः कठिनकङ्कपत्रैः कृष्णवर्णैः शाणशिलानिशितश्यामलशल्यवन्धैः कुसुमित इव तरुर्द्रुतेन शिलीमुखैः मच्छादितो धनञ्जयस्य रथवरः ।

दुर्योधनः—(सहर्षम्) ततस्ततः ।

सुन्दरकः—ततो देव, तीक्ष्णविदितनिशितभल्लबाणवर्षिणा धनञ्जयेनेषद्विद्धस्य भणितम्—'अरे रे वृषसेन, पितुरपि समरे न युक्तं मम कुपितस्याभिमुखं स्थातुम् । किं पुनर्भवतो बालस्य । तद्गच्छ । अपरैः कुमारैः सह गत्वा युध्यस्व ।' एवं वाचं निशम्य गुरुजनाभिलेषणोद्दीपितकोपोपरक्तमुखमण्डलार्पितभृकुटीभङ्गभीषणेन चापभारिणा कुमारवृषसेनेन मर्मभेदकैः पक्षपातिभिः सुदिवसकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणेन पुनर्वृथावचनैः ।

दुर्योधनः—साधु वृषसेन, साधु । सुन्दरक, ततस्तत. ।

सुन्दरकः—ततो देव, निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्डगाण्डीवज्याघातशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतनप्रतिषिद्धदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम् ।

दुर्योधनः—(साकूतम्) ततस्ततः ।

सुन्दरकः—ततो देव, तत्तादृशं प्रेक्ष्य शौरेः समरव्यापारचतुरथमविभावितत्वगारमुखधनुर्गुणगमनागमनशरसन्धानमोक्षचटुलकरतलेन कुमारवृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म ।

दुर्योधनः—ततस्ततः ।

सुन्दरकः—ततो देव, अनन्तरे विमुक्तसमरव्यापारो मुहूर्तं-

विश्रामितवैरानुबन्धौ कुलराजपाण्डवबलयोः 'साधु कुमारवृषसेन, साधु' इति कृतकलकलो वीरलोकोऽवलोकयितुं प्रवृत्तः ।

दुर्योधनः—(सविस्मयम्) ततस्ततः ।

सुन्दरकः—ततश्च देव, अवधीरितसकलराजमानुष्यकपराक्रमशालिनः सुतस्य तथाविधेन समरधर्मारम्भेण हर्षरोमकलणासङ्कटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरपञ्जरनिर्भीमसेने चाष्पपर्याकुला दृष्टिः कुमारवृषसेने ।

दुर्योधनः—(सभयम्) ततस्ततः ।

सुन्दरकः—ततश्च देव, उभयबलप्रवृत्तसाधुकारामर्षितेन गाण्डीविना तुरगेषु साध्यायति रथवरे धनुष्यपि जीवायामपि नरेन्द्रलाञ्छने सितातपत्रे च व्यापारितं सम्मं शिलीमुखासारं ।

दुर्योधनः—(सभयम्) ततस्ततः ।

सुन्दरकः—ततो देव, चिरधोलूलगुणकोदण्ड परिश्रमणमात्रव्यापारो मण्डलाग्रेण विचरितुं प्रवृत्त कुमारवृषसेनः ।

दुर्योधनः—(साशङ्कम्) ततस्ततः ।

सुन्दरकः—ततो देव, सुतरथविध्वंसनामर्षितेन स्वामिनाङ्गराजेनागणितभीमसेनाभियोगेन परिमुक्तो धनञ्जयरथो-परि शिलीमुखासारः । कुमारोऽपि परिजनोपनीतमम्मं रथमारुह्य पुनरपि प्रवृत्तो धनञ्जयेन सहायोद्धुम् ।

उभौ—साधु वृषसेन, साधु । ततस्ततः ।

सुन्दरकः—ततो देव, भणितं च कुमारेण 'रे रे तातापराधिषेपमुखर मध्यमपाण्डव मम शरास्तव शरीरमुपरिकल्पान्यकिमद्य निपतन्ति' इति भणित्वा शरसहस्रैः पाण्डवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः ।

दुर्योधनः—(सविस्मयम्) अहो बालस्य पराक्रमो मुग्धस्य भावेऽपि । ततस्ततः ।

सुन्दरकः—ततश्च देव, तं शरसन्धानं समवधूय निशितशरा भिघातजातमन्युना किरीटिना गृहीता रथोत्सङ्गात्क्य णत्कनत्काञ्चिकिङ्किणीजालझङ्कारविराविणी मेघौघरोधविमुक्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमाराभिमुखी ।

दुर्योधनः— सविषादम्) ततस्ततः ।

सुन्दरकः—ततो देव, प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात् सशरं धनुर्हृदयाद्वीरसुलभ उत्साहो नयनाद्बाष्पसलिलमपि । रसितं च सिंहनादं वृकोदरेण । हुंकारं दुष्करमित्याक्रन्दितं कुरुवरेण ।

दुर्योधनः—(सक्रियादम् ततस्ततः ।

सुन्दरकः—ततो देव, कुमारवृषसेनाकर्णपूरितै र्निशितशरैर्गाढविरं निर्भर्त्सयंश्चैव रथं मार्गीरथ्यामागच्छन्तीं यथा भगवता विषमलोचनेन तथा त्रिधा कृता शक्तिः ।

दुर्योधनः—साधु वृषसेन, साधु । ततस्ततः ।

सुन्दरकः—ततश्च देव, एतस्मिन्नन्तरे कलमुखरेण वीरलोकसाधुवादेनान्तरित समरतूर्यनिर्घोषः । सिद्धचारणगणविमुक्तकुसुमप्रकरेण प्रच्छादितं समराङ्गणम् । भणितं च स्वामिनाङ्गराजेन 'भो वीर वृकोदर, असमाप्तस्तव ममापि समरव्यापारः । तदनुमन्यस्व मां मुहूर्तम् । प्रेक्षावहे तावद्भरतस्य तव भ्रातुश्च धनुर्वेदशिक्षाचातुरत्वम् । तवाप्येतत्प्रेक्षणीयम्' इति ।

दुर्योधनः—ततस्ततः ।

सुन्दरकः—ततो देव, विश्रमितायोधनव्यापारौ मुहूर्तमिव

मितनिजवैरानुबन्धौ द्वावपि भेदकौ जातौ भीमसेनाक्रान्तौ ।

दुर्योधनः — साभिप्रायम् । ततस्तत. ।

सुन्दरकः — ततश्च देव. शक्तिखण्डनामधेयेन गाण्डीविना भणितम् 'अरे रे दुर्योधनप्रमुखा (इत्यनेन लज्जां नाटयति ।)

दुर्योधन.—सुन्दरक कथ्यताम् । परवचनमेतत् ।

सुन्दरकः—शृणोतु देव । अरे दुर्योधनप्रमुखा. कुरुवंशसेनाप्रभव. अविनयनौकर्णधार कर्ण युष्माभिर्मम पराक्रमं बहुभिर्महारथै. परिवृत्यैकाकी मम पुत्रकोऽभिमन्युर्व्यापादित । अहं पुनर्युष्माकं प्रेक्षमाणानामेवंविधं कुमारवृषसेनं स्वर्गाध्वसेवं करोमि ।' इति भणित्वा ज्ञगर्जमारफालित मलेन यज्ञनिर्वानमोक्षभीषणजोरावं गाण्डीवम् । दत्ता मिनापि लज्जीकृतं कालपृष्ठम् ।

दुर्योधनः —(साधिक्षेपम् । ततस्तत. ।

सुन्दरकः—ततश्च देव, प्रतिपिक्षभीमसेनन्मरकर्मोत्कर्षेण गाण्डीविना विरचिते अङ्गराजवृषसेनवधदुःखदग्धे क्षोभनतौ । ताभ्यामपि झाम्बामन्योन्यदर्शनविक्षाविशेषाभ्यामभियुक्त. स्व पुरानीतो मध्यमपाण्डव ।

दुर्योधन —ततस्तत ।

सुन्दरकः—ततश्च देव, गाण्डीविना सारथिसंज्ञयाभिधीयमानविज्ञातवासावसेन लघ्वाचरितं पनिभिर्यथा न दृश्यते न श्रूयते न रथा न धरणी न कुमारो न केतुचंरो न वलानि न सारथे न तुरङ्गमा न दिशो न विलोक्यश्च लक्ष्यते ।

दुर्योधनः—(सविस्मयम् । ततस्तत. ।

सुन्दरकः—ततश्च देव, अतिक्रान्ते शरवर्षे क्षणमात्रं सांसिद्ध

नादं पाण्डवबले विमुक्ताक्रन्दे कौरवबले उत्थितो महाकलकलो हा हतः कुमारवृषसेनो हा हत इति ।

दुर्योधनः—(सबाष्परोधम्) ततस्ततः ।

सुन्दरकः—ततो देव, महत्या वेलया प्रेक्ष्य हतसारथितुरङ्गं लूनातपत्रकेतुध्वजं स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव मर्मभेदिना शिलीमुखेन भिन्नदेहं रथमध्ये परिस्थितं कुमारमागतः ।

दुर्योधनः—(साश्रुम्) अहह कुमारवृषसेन । अलमतः परं श्रुत्वा । हा वत्स वृषसेन, हा मद्बन्धुदुर्ललित, हा गदायुद्धप्रिय, हा राधेयकुलमनोहर, हा प्रियदर्शन, हा दुःशासननिर्विशेष, हा सर्वगुरुवत्सल, प्रयच्छ मे प्रतिवचनम् ।

पर्यासनेऽमलचिरोदितचन्द्रकान्त-
मुद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापहारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्कथमिवाननपङ्कजं ते ॥८॥

सूतः—आयुष्मन्, अलमत्यन्तदुःखावेगेन ।

दुर्योधनः—सूत पुरुषवन्तो हि दुःखभाजो भवन्ति । अस्माकं पुनः—

प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।
हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा ॥ ९ ॥

(मोहमुपगतः ।)

सूतः—समाश्वसितु समाश्वसितु महाराजः । (पटान्तेन वीजयति ।)

दुर्योधनः—(लब्धसंज्ञः) भद्र सुन्दरक, ततो वयस्येन किं प्रतिपन्नमङ्गराजेन ।

सुन्दरकः—ततश्च देव, तथाविधस्य पुत्रस्य दर्शनेन संगलितमश्रुजातमुज्झित्वानवेक्षितपरिग्रहणाभियोगेन स्वयमि-

नामियुक्तो धनञ्जय. । तं च सुतवधामर्षोद्दीपितपराक्रमं तथा परिक्रामन्तं प्रेक्ष्य नकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनञ्जयस्य रथः ।

दुर्योधनः—ततस्ततः ।

सुन्दरकः—ततो देव. शल्येन गणितम्—' अङ्गराज, ततस्तुरङ्गमो भग्नकूबरस्ते रथो न योग्यो भीमार्जुनाभ्यां सहायो दृश्यम ' इति परिवर्तितो रथोऽवतारितः स्वामी स्यन्दनाग्रहणकारं च समाश्वासितः । ततश्च स्वामिना सुचिरं विलप्य परिजनोपनीतमन्यं रथं प्रेक्ष्य दीर्घं निःश्वस्य मयि दृष्टिर्विनिक्षिप्ता । सुन्दरक. पलायेति भणितं च । ततोऽहमुपगतः स्वामिसमीपम् । ततोऽपनीय शौर्पस्थानात्पट्टिकां शरीरसंगलितैः शोणितबिन्दुभिर्लिप्तमुखं बाणं कृत्वाभिलिख्य प्रेषितो देवस्य सन्देश ' (पट्टिकामर्पयति । दुर्योधनो गृहीत्वा वाचयति ।)

'अस्ति. महाराजदुर्योधनं समराङ्गणारब्धं पलदन्तं कण्ठे गाढमालिङ्गच विज्ञापयति ।

अल्पग्रामविधौ कृतौ न समरेष्वस्यास्मि तुल्य पुमान्
भ्रातृभ्योऽपि समाधिकोऽयमधुना ज्ञेयाः पृथासूनव. ।
यत्सम्भावित इत्यहं न च हतो द्रु शासनादिर्मया
तं तु स्वप्रतिकारमेहि भुजयोर्वीर्येण बाणेन वा ॥ ६ ॥'

दुर्योधनः-- वयस्य कर्ण, किमिदं भ्रातृशतवधदुःखितं मामपरेण बाकशल्येन घट्टयसि । भद्र सुन्दरक अधिज्यौ किमाकृष्टौ अङ्गराज ।

सुन्दरकः—देव. अद्याप्यारभ्य पृच्छ्यते । अपनीतशरीरावरण आत्मवधकृतनिश्चय पुनरपि पार्थेन सह समरं मार्गयते ।

दुर्योधनः—(आसनादासनादुत्थितम्) सूत. रथमुपनय ।

सुन्दरकः, त्वमपि मद्धनादविलम्बं गत्वा वयस्यमङ्गराजं

प्रतिबोधय । अरामरिसाहुवेन । अभिन्न एवायमावयो-
सङ्कल्पः । न खलु भवानेको जीवितपरित्यागाकाङ्क्षी ।
किंतु ।

कृपा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा
मुक्त्वा वाष्पं सह कतिपयैर्मन्त्रिभिश्चारिमिश्र ।
कृत्वान्योन्यं सुचिरमपुनर्भाचि गाढोपगूढं
संत्यक्तावो ज्वलनमुभिमां दुःखितौ निर्वृतौ च ॥ १७ ॥

अथवा शोकं प्रति मया न किञ्चिदसन्देष्टव्यम् ।

कृपसेनो न ते पुत्रो न मे दुःशासनोऽनुजः ।
त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि ॥ १८ ॥

सुन्दरक.—यद्देव आज्ञापयति । (निष्क्रान्त ।)

दुर्योधन —तूर्णमेव रथमुपस्थापय । (?)

सूतः—(पत्रं दत्त्वा) देव, हेषासंवलितो नेमिध्वनिः श्रूयते ।
तथा तर्कयामि नूनं परिजनोपनीतो रथ ।

दुर्योधन —सूत, गच्छ त्वं सज्जीकुरु ।

सूत —यदाज्ञापयति देव. । (निष्क्रम्य पुनः प्रविशति ।)

दुर्योधन. —(विलोक्य) किमिति नाकृतोऽसि ।

सूतः—एष खलु तातोऽम्बा च रुक्मवर्णाधिष्ठितं रथमारुह्य
देवस्य समीपमुपगतौ ।

दुर्योधनः —किं नाम तातोऽम्बा च सम्प्राप्तौ । कष्टमविधेय-
त्समाचरितं दैवेन । सूत, गच्छ त्वं स्यन्दनं तूर्णमुपनय ।
अहमपि तावदेनं परिहरन्तेऽन्तं निष्ठामि ।

सूत —देव, त्वदेकशोकसन्तप्तायेतौ कथमिव न समाश्वासयसि ।

दुर्योधन —सूत, कथमिव समाश्वासयामि विमुक्तभाग्धेय ।
पश्य ।

अन्धत्वार्तां रणभुवगतौ तातमम्बां च दृष्ट्वा
आर्तस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च

तस्मिन्काले प्रलयमरिणा प्रापिते तावकस्थां
पार्श्वं पित्रोरुपगतघृणं किं नु वक्ष्यामि गत्वा ॥१-४
तथाप्यवश्यं वक्तव्यो गुरु । (निष्क्रान्त सूत ।)
(तत प्रविशति रथमानेन गान्धारा सञ्जयो धृतराष्ट्रश्च ।)

धृतराष्ट्र —वत्स सञ्जय, कथय कथय कस्मिन्नुद्देशे कुरुकुलकाननैकशेखरवालो वत्सो मे दुर्योधनस्तिष्ठति । कच्चिज्जीवति वा न वा ।

गान्धारी—जात, यदि सत्यं जीवति मे वत्सस्तत्कथय कस्मिन्देशे वर्तते ।

सञ्जयः—नन्वेष महाराज पक्ष इव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

गान्धारा—(सकरुणम्) जात एकाक्षीति भणसि । किं नु खलु साम्प्रतं भ्रातृशतमस्य पार्श्वे सन्निधास्यति ।

सञ्जय —तात अम्ब, अवतरतं रथाद् भवान् । अमावतरणं नाटयत ।)

सञ्जय —(उपसृत्य) विजयतां महाराज । नन्वेष तातोऽम्बया सह प्रास किं न पश्यसि महाराज । (दुर्योधनो बलवत् नाटयति ।)

धृतराष्ट्रः—शल्यानि व्यपनीयकङ्कनदनैर्मोचिते कङ्कटे
बद्धेषु व्रणपट्टकेषु शनकै रूर्णं कृतापाश्रय ।
दुष्प्राप्तिर्जिगमिषुरिन्द्रियगणैरुत्पीडितो मर्मभि-
र्मह्या पुत्रक वेदनेति न मया पापेन पृष्टं भवान् ॥
(धृतराष्ट्रो गान्धारी च सस्नेहं परिष्वजते ।)

गान्धारी—वत्स, अतिगाढप्रहारवेदनापर्यायकुलत्वादस्माभिः सन्धितेष्वपि न प्रसरति ते घाणे ।

धृतराष्ट्र —वत्स दुर्योधन किमद्यतनपूर्वं सन्नति मध्यप्युपम व्याहारः ।

गान्धारी—वत्स, यदि त्वमप्यस्मान्नालपसि तत्किं साम्प्रतं
वत्सो दुःशासन आलपत्वथ दुर्मर्षणो वान्यो वा।
(दौवारिक इति।)

दुर्योधनः—जातोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य चाप्पपयसां तव चाम्ब हेतुः।
दुर्जातमम्ब विमले भरतान्वये यः
किं मां सुतक्षयकरं सुत इत्यवैषि॥ १४॥

गान्धारी—जात, अलं परिदेवितेन। त्वमपि तावदेकोऽस्या-
श्चक्षुगलस्य मार्गोपदेशकः। तच्चिरं जीव। किं मे राज्येन
जयेन वा।

दुर्योधन:—मात: किमप्यसदृशं कृपणं वचस्ते
सुक्षत्रिया क्व भवती क्व च दीनसेवा।
निर्वत्सले सुतशतस्य विपत्तिमेतां
त्वं नानुचिन्तयसि रक्षसि मामयोग्यम्॥ १५॥

नूनं विचेष्टितमिदं सुतशोकस्य।

सञ्जय—महाराज, किं वायं लोकवादो विस्मृतः 'न घटस्य
कृपपतनं रज्जुस्तत्रैव प्रत्येतव्या' इति।

दुर्योधनः—अपुष्कलमिदम्। उपक्रियमाणाभावे किमुपकरणेन।
(दौवारिक इति।)

धृतराष्ट्रः—(दुर्योधनं परिष्वज्य) वत्स समाश्वसिहि।
समाश्वासय चास्मानिमामतिदीनां मातरं च।

दुर्योधनः—तात, दुःखेभ. समाश्वसिमि इदानीं युष्माकम्।
किन्तु—

कृष्णया सह युवामथ मया निहतपुत्रया।
विराजमानौ शोकेऽपि तनयानुशोचतम्॥ १६॥

गान्धारी—जात, पतदेव साम्प्रतं प्रभूतं यत्त्वमपि तावदेको

नानुशोचितव्य । तज्जास, प्रसीद । पश्य ते शीर्णाञ्जलि ।
निवर्त्यतां समरव्यापारात् । अपहियतां क्रुध पितुर्वचनम् ।
धृतराष्ट्रः—वत्स, शृणु वचनं तवाम्बाया मम च निहता
शेषबन्धुजनस्य । पश्य ।
दायादा स्व यवीयसेन गणिनास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रतः शमयतो भीतं अगत्फाल्गुनात् ।
यत्नानां निश्चलेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिषु मुञ्च तात पितरबन्धाविमौ पालय ॥ ६७ ॥
दुर्योधन —समरात्मतिनिवृत्य किं मया कर्तव्यम् ।
गान्धारी—जात, यत्पिता ते विदुरो वा भणति ।
सञ्जय —राजन्, पश्यमिदम् ।
दुर्योधनः—सञ्जय, अद्याप्युपदेशग्रन्थमस्ति ।
सञ्जय.—राजन्, यावत्प्राणिति तावदुपदेष्टव्यभूमिर्धीजि-
गीषु प्रज्ञावताम् ।
दुर्योधनः—, सक्रोधम्) शृणुमस्तावद्भवन एव प्रज्ञावतो
ऽस्मान् प्रति प्रतिरूपमुपदेशम् । , , , ,
धृतराष्ट्रः—वत्स, युक्तवादिनि सञ्जये किमत्र क्रोधेन । यदि
प्रकृतिमापद्यते तदहमेव भवन्तं ब्रवीमि । शृणुताम् ।
दुर्योधन —कथयतु तात. ।
धृतराष्ट्रः—वत्स किं चिरेण । सन्धत्तां भवानिहानामपि
युधिष्ठिरमीप्सितपणबन्धेन ।
दुर्योधन —तात, तनयस्नेहबद्धस्यादस्यां बालिशत्वात्सञ्ज-
यश्च कामयेवं ब्रवीतु । युष्माकमप्येवं व्यामोहः । अथवा
प्रभवति पुत्रनाशजन्मा हृदयस्य वः । अन्यच्च । तात,
अस्खलितप्राग्दृशतस्तदा वर्णितवासुदेवसामोपन्यासः
सम्मति वृणपिलाभद्वाचार्यानुजराजचक्रविपत्तिः स्वयंगी-
रमाश्लेषानुदाक्षपुरुषप्रवीरादाद्दमसुरावसानं च कथ-

मिव क्रीडिष्यति दुर्योधनः सह पाण्डवैः सन्धिम् ।
अन्यच्च नयवेदिन्सञ्जय,
क्षीयमानाः किल रिपोर्नृपाः सन्दधते परान् ।
दुःशासने हतेऽहीना वानुजाः पाण्डवा कथम् ॥ १८ ॥

धृतराष्ट्र —वत्स, एवं गतेऽपि मत्प्रार्थनया न किञ्चिन्न करोति युधिष्ठिर । अन्यच्च । सर्वमेवापकृतं नानुमन्यते ।

दुर्योधन —कथमिव ।

धृतराष्ट्र —वत्स, श्रूयतां प्रतिज्ञा युधिष्ठिरस्य । नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणान्धारयामीति । बहुच्छलत्वात्संग्राम-स्यानुजगामाशङ्कमानो यदय भवते रोचते तदेवासौ सज्जं सन्धातुम् ।

सञ्जय —एवमिदम् ।

गान्धारी—जात, उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम् ।

दुर्योधनः—तात, अम्ब, सञ्जय,
एकेनापि विनानुजेन मरणं पार्थः प्रतिज्ञातवान्
भ्रातॄणां निहते शतेऽथ विपदे दुर्योधनो जीवितुम् ।
तं दुःशासनशोणितासनमहं पित्रं गदाकोटिभि
र्भीमं द्रक्ष्यु न चिन्तयामि कृपणः सन्धिं विधास्यामहम् ॥

गान्धारी—हा जात दुःशासन, हा गदङ्कुलललित, हा युवराज,
अश्रुतपूर्वं खलु कस्यापि लोके ईदृशी विपत्तिः । हा वीरसूजननिनी हतगान्धारी दुःखशतं प्रक्ष्यति न पुनः सुतशतम् । (सर्वे रुदन्ति ।)

सञ्जय —(बाष्पमुत्सृज्य) तात, अम्ब, प्रतिबोधयितुं महाराजमिमां भूमिमुपागतौ । तदात्मापि तावत्संस्तभ्यताम् ।

धृतराष्ट्र —वत्स दुर्योधन, एवं विमुखेषु भागधेयेषु त्वयि चानुच्चति मानपर्वताग्रेषु त्वदेकजीवितालम्बनेयं तपस्विनी गान्धारी कथं शरणमहं च ।

दुर्योधन—श्रूयतां दत्तप्रतिपत्तुमिदानीं प्राप्तकालम् ।

कलिलभुवना मुक्तैश्वर्याम्बिलरक्षतविद्विषः
प्रणतशिरसां राज्ञां चूडासहस्रशतार्चना ।
अभिमुखमरीन्कुन्दान्मन्तो हता शतमात्मजा
वहतु रणगेणोढां तातो धुरं जहिलोभ्यया ॥ २० ॥
विपर्यये त्वस्याधिपतेरल्पहित ज्ञात्वधर्म स्यात् ।

(नेपथ्ये महान्कलकल ।)

गान्धारी—आकर्ण्य सभयम्) जात, कुतेतद् हाहाकारमिश्रं तूर्यरवितं श्रूयते ।

सञ्जय—देव भूमिरियमेवंविधानां भीरुजनबालजननी महानिनादानाम् ।

धृतराष्ट्र—कस्य सञ्जय शयनासनिभैरव खलु छिन्नारी हाहारव । कारणेनात्र महता भवितव्यम् ।

दुर्योधन—तात प्रसीद । पराङ्मुखं खलु दैवमस्माकम् ।
यावदपरमपि किंचिदन्वाहितं न आवयति तावदेवात्मापय
मां संग्रामावतरणाय ।

गान्धारी—जात मुहूर्तं तावन्मां मन्दभाग्यां समाश्वासय ।

धृतराष्ट्र—वत्स यद्यपि भवान्समराय कृतनिश्चयस्तथापि
वृद्ध पञ्चतीधानोपायश्चिन्त्यताम् ।

दुर्योधन—अम्बां क्षत्रियवधू मम परे हन्तुं न योग्या वद्ध
किं ना नैनं कोल शौरिर्द्रवं वन मनाशं रणे ।

गान्धारी—जात एकार्णवं त्वम् । कस्तो त्राणं दास्यति ।

दुर्योधन—यदीच्छे भवतीस्तुतत्त्वयकरो मातः क्षियन्तोऽरयः
लब्धं केवलमेतु दैवमधुना निष्पाण्डवां मेदिनीं ॥

(नेपथ्ये कलकलानन्तरम् ।)

भो भो नौधा, निर्वर्तन्तां भवन्तः धौरेयशब्दाश्च. इदं

महत्कदनं प्रवृत्तम् । अलमस्मिन्नधर्मपराङ्मुखतया । यतः कालानुरूपं प्रतिविधातव्यमिदानीम् ।

तथा हि ।

स्वक्तप्राजनरश्मिरङ्गितधनु पार्थाङ्कितैर्मार्गणै
र्व्याप्तं स्यन्दनवर्त्मनां परिचयादाकृष्यमाणं शनैः ।
वातोन्मङ्गपतोर्विलोकनजलैरावेष्टयन्पृच्छतां
शून्येनैव रथेन याति शिबिरं शल्य कुरूणां शृण्वताम् ॥२१॥

दुर्योधन.—(श्रुत्वा साशङ्कम्) आः, केनेदमविरचितमशनि पातदारुणमुद्घोषितम् । क कोऽत्र भोः ।

(प्रविश्य सम्भ्रान्त) सूत —हा, हताः स्म । (आत्मानं पातयति ।

दुर्योधन —आर्ये, कथय ।

धृतराष्ट्रसञ्जयौ—कथयतां कथयताम् ।

सूत.—आयुष्यन्, किमन्यत् ।

शल्येन यथा शल्येन मूर्च्छित प्रथिवता जनौघोऽयम् ।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥ २० ॥

दुर्योधन —हा वयस्य कर्ण । (मोहमुपागतः ।)

गान्धारी—जात समाश्वसिहि, समाश्वसिहि ।

सञ्जय —समाश्वसितु समाश्वसितु महाराज. ।

धृतराष्ट्र.—भो., कष्टं कष्टम् ।

भीष्मे द्रोणे च निहते य आसीदबलम्बनम् ।
तस्य मे सुहृच्छूरो राधेय. सोऽप्ययं हत. ॥२३॥

वत्स, समाश्वसिहि समाश्वसिहि । ननु भो हतार्यैर्,

अन्योऽनुभूतशतपुत्रविपत्तिदुःख
शोच्यां दशामुपगत सह भार्ययाहम् ।
अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निराश. ॥२४॥

वत्स दुर्योधन, समाश्वसिहि समाश्वसिहि । समाश्वासय तपस्विनीं मातरं च ।

दुर्योधन —(लब्धसंज्ञः

आयि कर्णं कर्णसुखदां प्रयच्छ मे
गिरमुद्विग्नमिव मुदं मयि स्थिरगम् ।
सततावियुक्तमकृताप्रियं कथं
वृषसेनवत्सल विहाय यासि माम् ॥२५॥

(पुनर्मोहमुपागत । मां समाश्वासय तत ।)

दुर्योधनः—मम प्राणाधिके तस्मिन्महात्मनामधिपे हते ।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात का कथा ॥२६॥

अपि च ।

शोचामि शोच्यमपि शत्रुहतं न यत्नं
दुःशासनं तमधुना न च बन्धुवर्गम् ।
यैनातिदुःश्रवमसाधु कृतं न कर्णं
कर्णस्य तस्य निधनं निधनं कुलस्य ॥२७॥

गान्धारी—जात, शिथिलय तावत् क्षणमात्रं बाष्पमोक्षम् ।

धृतराष्ट्रः—वत्स, क्षणमात्रं परिमार्जयाश्रूणि ।

दुर्योधन —मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारितः ।
तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्यते ॥२८॥

धृत, केनैतदसम्भवनीयमस्मत्कुलान्तकरणं कर्म कृतं स्यात् । [ ]

सूतः—आयुष्मन्, एवं किल जनः कथयति—

भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य ।
निहतस्य किलेन्द्रसूनोरस्मरसेनाहृतान्तस्य ॥ ३० ॥

दुर्योधन —कर्णानेनेन्दुस्मरणात् क्षुभित शोकसागर ।
वाडवेनेव शिशिना पीयते क्रोधजेन मे ॥ ३१ ॥

तात, शम्ब, प्रसीदतम् ।

ज्वलनः शोकजन्मा मामयं दहति दुःसह ।
समानायां विपत्तौ मे वरं संशयितं रणे ॥३२॥

धृतराष्ट्र —(दुर्योधनं परिष्वज्य रुदन्)

भवति तनय लक्ष्मी. साहसेष्वीदृशेषु
ध्रुवति हृदयमन्द्रीममुत्प्रेक्ष्य भीमम् ।
अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड
च्छलबहुलमरीणां लब्धरं हा हतोऽस्मि ॥३३॥

गान्धारी—जाल, तेनैव सुतशतकृतान्तेन वृकोदरेण समं समरं मारयसे ।

दुर्योधनः—तिष्ठतु तावद्वृकोदरः ।

पापेन येन हृदयस्य मनोरथो मे
सद्यो द्युचन्दनरसो नयनामृतेन्दुः ।
पुत्रस्तवाम्ब तव तात नयैकशिष्यः
कर्णो हतः सपदि तत्र शराः पतन्तु ॥ ३४ ॥

सूत, अलमिदानीं कालातिपातेन । सज्जं मे रथमुपवह । भयं चेन्पाण्डवेभ्यस्तिष्ठ । गदामात्रसहाय एव समरभुवमवतरामि ।

सूत.—अलमन्यथा सम्भावितेन । अयमहमागत एव ।

(निष्क्रान्त ।

धृतराष्ट्र —वत्स दुर्योधन, यदि स्थिर एवास्मान्दग्धुमयं ते व्यवसायस्तत्सन्धिद्वितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम् ।

दुर्योधनः—नन्वभिषिक्त एव ।

गान्धारी—जात कतर पुनः स यस्मिन्नाशामवलम्बिष्यसे ।

धृतराष्ट्र किं च शल्य उत वाश्वत्थामा ।

सञ्जयः—हा कष्टम् ।

गते भीष्मे हते द्रोणे कर्णे च विनिपातिते ।
आशा बलवती राजञ्शल्यो जेष्यति पाण्डवान् ॥३५॥

दुर्योधन —किं वा शल्येनोत वाश्वत्थाम्ना ।
कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा ।
अनिवारितसम्पातैरयमात्माश्रुवारिभि: । ३६ ॥

प्रविश्य सम्भ्रान्त) सूत —आयुष्मन्,
प्रासादैकरथारूढौ पृच्छन्तौ त्वामितस्तत ।

सर्वे—कश्च कश्च ।

सूत —स कर्णारि स च क्रूरो वृककर्मा वृकोदर ॥ ३७ ॥

गान्धारी —(सभयम्) जात किमत्र प्रतिपत्तव्यम् ।

दुर्योधनः—ननु सञ्चिन्तितैवेयं गदा ।

गान्धारी—हा हतास्मि मन्दभागिनी ।

दुर्योधन:—अम्ब, अलमिदानीं कार्पण्येन । सञ्जय, रथमा
रोप्य पितरौ शिबिरं प्रतिष्ठस्व । समागतोऽस्माकं
शोकापनोदी जन । २

धृतराष्ट्र —वत्स, क्षणमेकं प्रतीक्षस्व यावदनयोर्भीमसुपलभे ।

दुर्योधनः—तात किमनेनोपलम्भेन ।

(तत प्रविशतां भीमार्जुनौ ।)

भीम —भा भो दुर्योधनानुजीविनः किमिति सम्भ्रमादय-
मायुधं धरन्ति भवन्त: । कथयत तावदिदमावयोराग-
मनं स्वामिनस्तस्य कुरुपतेः । अलमायधौ शङ्कया ।

दुर्योधन —सूत, कथय गत्वोभयोरयं तिष्ठतीति ।

सूत —यथाज्ञापयति देव । (तानुपसृत्य) ननु भो वृको-
दरार्जुनौ, एष महाराजस्तातेनाम्बया च सह न्यग्रो-
धच्छायायामुपविष्टस्तिष्ठति ।

अर्जुन—आर्य, प्रसीद । न युक्तं पुत्रशोकोपपीडितौ पितरौ
पुनरस्महर्शनेन भूयसा दुःखयितुम् । तद् गच्छाव: ।

भीमः—मूढ, अनुल्लङ्घनीयः समुदाचारः । न युक्तमनभिवाद्य गुरून्गन्तुम् । (उपसृत्य) सञ्जय, पित्रोर्नमस्कृतिं श्रावय । अथवा तिष्ठ । स्वयं विश्राव्य नामकर्मणी वन्दनीयौ गुरू ।

अर्जुनः—(उपगम्य) तात, अम्ब,

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यम. पाण्डवोऽयम् ॥ ३८ ॥

भीमः—चूर्णितोरुपकौरव्यः स्त्रीणां दुःशासनाभुजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाश्रति ॥३९॥

धृतराष्ट्र—दुरात्मन् वृकोदर, न खल्विदं भवतैव केवलं स्वप
ज्ञानामपकृतम् । यावत् त्वं तावत्समरविजयिनो जिता
हताश्च वीराः । तत्किमयं विकत्थनाभिरस्मानुद्वेजयसि ।

भीमः—तात, अलं मन्युना ।

(नेपथ्ये —भो भो भीमसेनार्जुनौ, एष खलु श्रीमानजातशत्रु-
र्देवो युधिष्ठिर समाज्ञापयति ।

उभौ—किमाज्ञापयत्यार्यः ।

(पुनर्नेपथ्ये)—

कुर्वन्त्यासां हुतानां रणशिरसि नृणां बर्हिसाहेर्हभारा-
नस्मन्मित्रं कथञ्चिद्वदतु जलमसौ वाच्यचा याच्यचेभ्यः ।
मार्गन्तां ज्ञातिदेहान्हुतनरमहने खण्डितान्गृध्रकङ्के
रक्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ॥

उभौ—यदाज्ञापयत्यार्यः । (निष्क्रान्तौ ।

(नेपथ्ये)—अरे रे गाण्डीवाकर्षणवाहुशालिन्, अर्जुन अर्जुन,
क्वेदानीं गम्यते ।

कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि
यौधं विक्रान्तमासीद्विन इव भवतां यत्पुरस्ये रणेऽस्मिन् ।

स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनवजितन्यस्तहेतेरपेतः
कल्पाग्निः पाण्डवानां द्रुपदसुतचमूध्वस्मरो द्रौणिरस्मि ॥

धृतराष्ट्रः—(आकर्ण्य सहर्षम्) वत्स दुर्योधन, द्रोणवधप-
रिभवोद्दीपितक्रोधपावकः पितुरपि समधिकबल. शिखा-
वानमरोपमश्चायमश्वत्थामा प्राप्त. । तत्प्रत्युपगमनेन
तावदयं सम्भाव्यतां धीरः ।

गान्धारी—जात, प्रत्युद्गच्छैनं महाभागम् ।

दुर्योधन—तात अम्ब, किमनेनाङ्गराजवधायासितेन वृथायौ-
वनराज्यबलभरेण ।

धृतराष्ट्रः—वत्स न खल्वस्मिन् काले पराक्रमवतामेवंविधानां
बाह्यानेनापि विरागमुत्पादयितुमर्हसि ।

(प्रविश्य) अश्वत्थामा—विजयतां कौरवाभिगतिः ।

दुर्योधन—(उत्थाय) गुरुपुत्र, इत आस्यताम् । (उपवे-
शयति ।)

अश्वत्थामा—राजन्दुर्योधन,

कर्णेन कर्णसुभगं बहु यत्तदुक्तं
यत्सङ्गरेषु विहितं विदितं त्वया तत् ।
द्रौणिस्त्वभिज्यधनुरापतितोऽभ्यमित्र-
मेषोऽधुना त्यज नृप प्रतिकारचिन्ताम् ॥ ४२ ॥

दुर्योधन—(साभ्यसूयम्) आचार्यपुत्र,

अवसानेऽङ्गराजस्य योद्धव्यं भवता किल ।
ममाप्यन्तं प्रतीक्षस्व क्व कर्ण क्व दुर्योधनः ॥४३॥

अश्वत्थामा—(स्वगतम्) कथमद्यापि स एव कर्णपक्षपातः ।
अस्मासु च परिभवः । प्रकाशम्) राजन्नौरवेश्वर, एवं
भवतु । (निष्क्रान्तः ।)

धृतराष्ट्रः—वत्स, क एष ते व्यामोहो यदस्मिन्नपि काले एवं-
विधस्य महाभागस्याश्वत्थाम्नो बाष्पपरुष्येणापराधमु-
त्पादयसि ।

दुर्योधन.—किमस्याप्रियमनृतं च मयोक्तम् । किं वा नेदं क्षोभस्थानम् । पश्य ।

अकलितमहिमानं क्षत्रियैरात्तचापैः
समरशिरसि युष्मद्भाग्यदोषाद्विपक्षम् ।
परिवदति समक्षं मित्रमङ्गाधिराजं
मम खलु कथयास्मिन्को विशेषोऽर्जुने वा ॥ ४४ ॥

धृतराष्ट्रः—वत्स, तवापि कोऽत्र दोष. । अवसानमिदानीं भरतकुलस्य । सञ्जय, किमिदानीं करोमि मन्दभाग्य. । (विचिन्त्य भवत्वेवं तावत् । सञ्जय, मद्वचनाद् ब्रूहि भारद्वाजमश्वत्थामानम् ।

स्मरति न भवान्पीतं स्तन्यं विमज्य सहासुना
मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः ।
अनुजनिधनस्फीताच्छोकाद्रिपणयाच्च यदू
वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया ॥४५॥

सञ्जय.—यदाज्ञापयति तात । (उत्तिष्ठति ।)

धृतराष्ट्रः—अपि चेदमन्यत्त्वया वक्तव्यम् ।

यन्मोचितस्त्वया पिता वितथेन शस्त्रं
यत्तादृशः परिभव स तथाविधेऽभूत् ।
एतद्विचिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपहाय चिरास्यसीति ॥४६॥

सञ्जय —यदाज्ञापयति तात. । (निष्क्रान्त ।)

दुर्योधन —सूत, साङ्ग्रामिकं मे रथमुपकल्पय

सूतः—यदाज्ञापयत्यायुष्मान् । (निष्क्रान्त. ।)

धृतराष्ट्रः—गान्धारि, इतो वयं मद्राधिपतेः शल्यस्य शिबिरमेव गच्छाम. । वत्स. त्वमप्येवं कुरु ।

(परिक्रम्य निष्क्रान्ताः सर्वे ।)

मरीचि-वृत्तान्तः ।

देव, त्वयि तदावर्तीर्णे द्विजोपकारायासुरविवरं त्वदन्वे षणप्रसृते च मित्रगणेऽहमपि महीमटन् 'अङ्गेषु गङ्गातटे यद्दि-श्चमपाया कश्चिदस्ति तप प्रभावोत्पन्नदिव्यचक्षुर्मरीचिर्नाम महर्षि' इति कुतश्चित् संलपतो जनसमाजादुपलभ्यामुतो बुभुत्सुस्तद्वृत्तिं तमुद्देशमगमम् । न्यग्रोधस्य च तस्मिन्नाश्रमे कस्यचिच्चूलपातकस्य छायायां कमप्युद्भिन्नवर्णं तापसम् । अमुना चानिशिवदुपचरित क्षण विश्रान्त क्वासौ भगवा न्मरीचि । तस्मादहमुपलिप्सु प्रसङ्गोपनतस्य सुहृदो गतिम् । आश्चर्यशालिनिभो हि स महर्षिर्मया निश्चुल ' इत्य वादिषम् । अथासावुत्थायत च निश्वस्यासंस्तु— आसी त्तादृशो मुनिरस्मिन्नाश्रमे । तमेवदा काममञ्जरी नामाङ्ग-पुरीवृत्तसख्यानीया वारयुवतिरश्रुबिन्दुतारकितपयोधरा स निर्वदमवेत्य कीर्णशिग्रुगङ्गास्तीर्णभूमिरभ्यवन्दिष्ट । तस्मि-न्नेव च क्षणे मातृप्रमुखस्तदात्मवर्गं सानुनोशमनुप्रधावितस्त त्रैवापविद्धनिपातमपतत् । न किल कृपलुप्तं जगन्मात्रेया गि•श्वास्यार्तिहारणं तां गणिकामभूच्छत् । सा तु सर्वाङ्गेव सविषादेव सगौरवेव चाब्रवीत् -'भगवन्, पैहिकस्य सुख-स्यागाजनं जनोऽयमामुष्मिकाय श्वोवसीयानभ्युपपत्ति वित्तयंभगवत्पादयोर्मूलं शरणमभिप्रपन्न ' इति । तस्यास्तु जनन्युद्वर्जति पलितशारशिरण्डवन्धरुग्णमुखभूमिरभापत-'भगवन् अस्या म दोषमंगा वो दासी विज्ञापयति । दोषश्च मम स्वाधिकारानुष्ठापनम् । एव हि गणिकामानुरभिकारो यद्दुहितुर्जन्मन प्रभृत्येवाङ्कक्रिया, तेजोवलवर्णमेधासंवर्धनेन

वीर्याग्निधातुसाम्यकृता मितेनाहारेण शरीरपोषणम्, आप-
च्चमाद्यर्पोपितुरप्यनतिदर्शनम्, जन्मदिने पुण्यदिने चोत्स-
वोत्तरो मङ्गलविधि, अध्यापनमनङ्गविद्यानां साङ्गानाम्,
नृत्यगीतवाद्यनाट्यचित्रास्वाद्यगन्धपुष्पस्रजासु लिपिज्ञानवच-
नकौशलादिषु च सम्यग्विनयनम्, शब्दहेतुसमर्थविद्यासु
वार्तामात्रावबोधनम्, आजीवज्ञाने क्रीडाकौशले सजीव-
निर्जीवासु च द्यूतकलास्वभ्यन्तरीकरणम्, यात्रोत्सवादिष्वा-
दरप्रलोभितायाः स्फीतपरिवर्हाया प्रकाशनम् प्रसङ्गवत्यां
सङ्गीतादिक्रियायां पूर्वसंगृहीतैर्मोह्यवाभि-, सिद्धिलम्भनम्,
दिङ्मुखेषु लक्षचिह्नपथिकैर्यश प्रख्यापनम्, कार्तान्तिका-
दिभि कल्याणलक्षणोद्घोषणम्, पीठमर्दविटविदूषकैर्भिक्षु-
कयादिभिश्च नागरिकसमवायेषु रूपशीलशिल्पसौन्दर्यमा-
धुर्यमहत्त्वविज्ञा, युवजनमनोरथलब्धभूताया प्रभूततमेन शु
ल्केनावस्थापनम्, स्वयं रागान्धाय तद्भावदर्शनोन्मादिताय
वा जातिरूपवयोऽर्थशक्तिशौचत्यागवाक्यदाक्षिण्यशिल्पशील
माधुर्योपपन्नाय स्वतन्त्राय प्रदानम् अधिकगुणायास्वतन्त्राय
प्राप्तमायान्तेनापि बहुव्यपदेशेनार्पणम्, अस्वतन्त्रेण वा
गन्धर्वेणेमामनेन तद्गुरुश्च. शुल्कापहरणम्, अरागेऽर्थस्य
कामस्वीकृते स्वामिन्यधिकरणे च साधनम् रक्तस्य तुष्टि-
कचारिणीव्रतानुष्ठापनम् नित्यनैमित्तिकप्रीतिदायकतया
हृतारिष्टानां गन्धधनानां चिरैरपायैरपहरणम्, हृदयता
लुब्धप्रायेण च विगृह्यास्वनम्, प्रतिहस्तप्रोत्साहनेन लुब्ध-
स्य रागिगुम्त्यागशक्तिसन्धुक्षणम्, अनारक्ष्य चाकृत्यं
तत्त्वज्ञलोकोपक्रोशनैर्दुःखनिरोधैर्मोहोत्पादनैरन्याभियोग-
स्वमानैश्चापघातनम्, अर्थैरनर्थप्रतिघातिभिश्चानिन्द्यै
रित्यैरनुबद्धार्थानर्थसंशयान् विचार्य भूयोभूय संयो
जनमिति । गणिकायाश्च सर्वथा मातुर्मातृकायाश्च ।

शासनानुवृत्ति । एवं स्थितेऽसावतिक्रम्य स्वकुलधर्मं मर्थानिरपेक्षा गुणेभ्य एव स्वं यौवन विचिक्रीषते । कुलस्त्रीवृत्तमेवाच्युतमनुतिष्ठासति । गम्यजनश्च भूयानर्थ-योग्य प्रत्याचक्षाणयाऽनया प्रकोपित । स्वकुटुम्बकं चाव सादितम । यथा कुमतिर्न कल्याणी' इति निवारयन्त्या मयि वनवासाय कोपात्प्रस्थिता । सा चेदियमहार्यनिश्चया सर्व एव जनोऽनेवान्यगतिरनशनेन संस्थास्यते' इत्यरोदीत् । अथ सा वारयुवतिस्तेन तापसेन भद्रे नन्नु दुःखाक्रोड्य यननास । तस्य फलमपवर्गं स्वर्गो वा । प्रथमस्तु तयो अदृष्टानलाभ्य प्रायो दुःसम्पाद एव । द्वितीयस्तु सर्वस्यैव सुलभ कुलधर्मानुष्ठायिन । तदशक्यारम्भादुपरम्य मातुर्मते चर्तुन्न इत्र सानुकम्पमभिहिता 'यदीह भगवत्पादमूल मशरणम् शरणमस्तु मम दृष्पणाया हिरण्यरेता दत्त एव' इत्युदभर्तायत । स तु मुनिरन्तर्विमृश्य गणिकामातरमवदत् स्वमर्पति गच्छ गृहान् । प्रतिदत्त कानिचिद्दिनानि यावदियं सुचिरनीरा सुखोपभोगसुचिता सत्यरण्यवासदुःखसन्नोद्वेजिता भूयोभूयश्चास्मानिविचेष्यमाना प्रकृतावेव स्थास्यति इति । तथा इति तस्या प्रतिपद्य स्वजन स्व गणिका तस्मिन् मायुभक्तिमाद्विमनीयबालिनी नात्याहितशरीरसस्कारा वनस्पतीना नवालपूरणदेवतार्चनमुपोद्यायाचयप्रयासैकै विकरोपहारकर्मभि कामशास्त्रज्ञश्च गन्धमाल्यधूपदीप नृत्यगीतवाद्यादिभि क्रियाभिरकालेऽपि त्रियामसम्भिन्नाभि कथाभिरात्मानमाराधयामास । एव कालेनान्वरक्षत् । एकदा च रहसि रक्त तमुपलभ्य 'मूढ खलु लोको यत्सद्ध धर्मेणार्थकामावपि गणयति इति निश्चिदन्मयत । अथय वास्तु कैनाशेनार्थकामातिशायी धर्मस्त्वयाभिप्रेत ' इति प्रीतिना मरीचिना लज्जामन्यरमारभताभिधातुम्—' इत किल जना

ऋगवतस्त्रिवर्गावलावलक्षानम् । अथवैतदपि प्रकारान्तरं दासजनानुग्रहत्य । भवतु, श्रूयताम् । ननु धर्मोद्देतेऽर्थकाम-योरनुत्पत्तिरेव । तदनपेक्ष एव धर्मो निवृत्तिसुखप्रसूतिहे-तुरात्मसमाधानमात्रसाध्यश्च । सोऽर्थकामवद्बाह्यसाधनेषु नात्यायतते । तत्त्वदर्शनोपबृंहितश्च यथाकथञ्चिदप्यनुष्ठीय-मानाभ्यां नार्थकामाभ्यां बाध्यते । बाधितोऽपि चलिपायास-प्रतिसमाहितस्तमपि दोषं निर्हृत्य श्रेयसेऽनल्पाय कल्पते । धर्मभूते च मनसि नभसीव न जातु रजोऽनुपज्यते । तन्मन्ये 'नार्थकामौ धर्मस्य शततमामपि कलां स्पृशतः' इति । अत्रैतदपिकदर्णनरागबृंहितस्त्वमधात्— अयि विलासिनि साधु पश्यसि । किन्तु जन्मनः प्रभृत्यर्थकामचालनाभिज्ञा वयम् । शैवौ चेमौ किरूपौ किंपरिवारौ किंफलौ च' इति । स्मा त्वया-दीत्— अर्थस्तावद्जनपदधनरत्नात्मकः, कृषिपाशुपाल्यवा-णिज्यसन्धिविग्रहादिपरिवारस्तीर्थप्रतिपादनफलश्च । काम-स्तु विषदामिषकुचलसोः स्त्रीपुंसयोर्निरतिशयसुखरूपश्चवि शेषः । परिवारस्त्वस्य यावदिह रम्यमुज्ज्वलं च । फलं पुन परमाह्लादनं स्मर्यमाणमधुरमुदीरिताभिमाननमनुत्तमं सुख मपरोक्षं स्वसंवेद्यमेव । तस्यैव कृते धिरिष्टस्यानल्पानि. कष्टानि तपांसि महान्ति दानानि दारुणानि युद्धानि भीमानि सर्मुद्रलङ्घनादीनि च नरा समाचरन्ति' इति । निशम्यैतन्नि यतिबलान्तु तत्पाटवान्तु स्वबुद्धिमान्द्यान्तु स्वनियममनादृत्य तस्यामसौ प्रासजत् । सा सुदूरं मूढात्मानं च तं प्रवृद्धेन नीत्या पुरमुदारशोभयः राजवीथ्या स्वभवनमनैषीत् । अभूच्च शोभणा ऽ.. कामोत्सवः' इति । उत्सवेषु स्नातानुलिप्तसमर्चितमल्लुमालमारब्धकर्मिजनवृतं नियुक्त स्वकृताभिलाषं क्षणमात्रेण गतेऽपि तया विना दूयमानं तमृषिबुद्धिमता राजमार्गणोत्सवसमाजं नीत्वा क्वचिदुप-

मनोहरैः युवतिजनशतपरिवृतस्य राज्ञ सन्निधौ स्मित-
मुखेन तेन 'भद्रे, भगवता सह निषीद' इत्यादिष्टा
सविभ्रमं कृतप्रणामा ससिमतं न्यषीदत्। तत्र काचिदुत्थाय
बद्धाञ्जलिरुक्तमाह्वना देव, जितान्यायाहम्। अस्यै दास्यमद्य
प्रभृत्यभ्युपेतं मया' इति प्रभुं प्रार्थयति। विस्मयहर्षमूलश्च
कोलाहलो लोकस्योदजिहीत। हृष्टेन च राज्ञा महार्हैः रत्नाल
ङ्कारैर्महता च परिच्छदेणानुगृह्य विसृष्टा सा मुरवैश्च गणैश्च प्रशस्यमाना स्वभवनमगच्छत्। तमुपेयुषश्च-
'भगवन्, अयमञ्जलिः। चिरमनुगृहीतोऽयं दासजनः। स्वार्थं
इदानीमनुशिष्यतां इति। स तु रागादशनिहत इवोद्भ्रान्तो-
ऽवोचत्— प्रिये, किमेतत्। कुत इदमौदार्यशून्यम्। क्व गतस्तव
मय्यसाधारणोऽनुराग इति। अथ सा ससिमतमवादीत्
भगवन् यथाद्य राजकुलं मच्च पराजयोऽभ्युपेतस्तथाहं
मम च कस्मिंश्चित्स्वर्थे महर्षिमरीचिमावर्जितवतीव श्लाघते
इति तथाप्यहमभिधित्सा। दास्यपदबन्धेन चाकिञ्चनार्थं
प्रार्थयेऽपि। सिद्धार्था चास्मि स्वत्प्रसादात् इति। न तया
तथाविधया दुर्मति. कृतानुशय शून्यवन्यदतिष्ठ। यस्तर्यं
कृतस्तवपर्वा नमेव मां महाभाग मन्यस्व। स्वशक्तिनिर्मितं
रागमुद्धृत्य नयैव बन्धक्या महद् वैराग्यमर्पितम्। अचिरादेव
शक्य आ मा स्वदर्थसाधनक्षम कर्तुम्। अस्यामेव तावत्कृपा
कृपुर्यां चम्पायाम्' इति।

अथ तन्मनश्चुक्षुतम रणभिमंवाहतं रविरगात्।
ऋषिमुक्तश्च राग सन्ध्यात्वेनाकृत। तत्कथादत्तवैराग्या-
णीव कमलवनानि समुचुचुः। अनुमतमुनिशासनस्तमुनै-
व सहोपास्य सन्ध्यामनुरुरोध। अथाभिक्तमनुशास्य नीत-
रात्रि. प्रत्युन्मिषत्युदयमस्यदावकल्पे कल्पद्रुमैकसरायाय-
धीरिरयरणार्चिषि तं नमस्कृत्य नगरायोदचलम्।

अथ भगवन्तं मरीचिं यशश्चक्रादुत्थाय पुनः प्रविततलपः-प्रभावप्रत्यापन्नदिव्यचक्षुषमुपसंगम्य तेनास्येवंभूतरूपदर्शन-मवगमित ।

चन्द्रापीडं प्रति शुकनासस्योपदेशः ।

तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाहमप्युपदेष्टव्यमस्ति । केवलं निसर्गत एवाभानुमेय-मरत्नालोकेन्द्रुमप्रदीपप्रभापनेयमालिङ्गनं तमो यौवन-प्रभवम् । अपरिणामोपशमो दारुणो मदः । कष्टमनञ्जन-मविलक्ष्यमपरमैश्वर्यतिमिरान्धत्वम् । अशरीरोपचारह्रा-योऽत्यन्ततीव्रो दर्पदाहज्वरोष्मा । सततमसूत्रमनङ्गग्रहो वि-षमो विषयविषास्वादमोहः । नित्यमस्नानशौचवधो मल-धाम्रागमलाचलेप । अजस्रमच्छपवस्त्रानभ्रबोधो घनं च राजसुखमनिपातनिद्रा भवति । इयतां विस्तरेणाभियो-गे । गर्भेऽवस्थानमभिनवयौवनत्वमप्रतिमरूपत्वमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा । सर्वोविनयानामेकैकमप्य-पायायतनम् । किमुत समवायः । यौवनारम्भे च प्राय शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनु-जिघृक्षतामपि सरागैव भवति यूनां दृष्टिः । अपहरति च बाल्येव शुक्लपक्षं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवन-समये पुरुष प्रकृतिः । इन्द्रियहरिणद्वारिणी च सततमति-दुरन्तेयमुपभोगमृगतृष्णिका । नवयौवनकषायितात्मनश्च स-

लिलानीव तान्येव विषयरूपाण्यास्वाद्यमानानि मधुरतरा
ण्यापतन्ति मनस । नाशयति च विद्भोह इवोन्मार्गप्रवर्तक
पुरुषमत्यासङ्गो विषयेषु । अधादृशा एव भवन्ति भाजनान्यु
पदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव रज
निकरगभस्तयो विशन्ति सुखमुपदेशगुणा । गुरुवचनममल
मपि राजितमिव महद्भुपजनयति श्रवणस्थितं शूलमभव्यस्य ।
इतरस्य तु कर्णे इव शङ्खाभरणमानलशोभासमुदयमधिक
तरमुपजनयति । हरति च सकलमलिनमन्धकारमिव
दोषजातं प्रदीपसमर्पितकर इव गुरूपदेश प्रथमहेतुर्धर्म
परिणाम इव पलितरूपेण विरलिजजालमलीयुर्नम्रगुणरूपेषु
तदेव परिणमयति । अयमेव चानास्वादितविषयरसस्य ते
काल उपदेशस्य । कुसुमशरशरप्रहारजर्जरिते हि हृदये जल-
मिव गलत्युपदिष्टम् । अकारणे च भवति दुष्प्रकृतेरन्वय
युतं वा विनयस्य । चन्दनप्रभवो न दहति किमनल । किं वा
प्रथमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ।
गुरूपदेशश्च नाम पुराणमस्खलितप्रक्षालनक्षममजलं स्ना
नमनुपजातपलितादिवैरूप्यमजरं सूक्ष्मदर्शनारोपितमेदोदोषं
गुरुकरणमसुवर्णविरचनमप्राप्यं कर्णाभरणमतीतज्योतिरा-
लोको नोद्वेगकर प्रजागरः । द्विषेषेण तु राज्ञाम् । विरला हि
नृपामुपदेष्टार । प्रतिशब्दक इव राजवचनमनुगच्छन्ति जनो
ऽयात् । उद्दामदर्पान्धयुवस्थगितश्रवणनिवारश्चोपदिश्यमान-
मपि ते न शृण्वन्ति । शृण्वन्तोऽपि च राजनिमीलितेनाधी-
रयन्त । खेदयन्ति हितोपदेशदायिनो गुरून् । अहङ्कारदाहज्वर-
मूर्छान्धकारिता विह्वला हि राजप्रकृति । अर्थाभिमानो
न्मादकारीणि धनानि । राज्यविषनिवारतन्द्राप्रदा राजलक्ष्मी ।

आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् ।
इयं हि सुभटपद्मसरोवरोत्पाटननिस्त्रिंशभ्रमरी राज्ञी । धीर-

सागरात्पारिजातपल्लवेभ्यो रागमिन्दुशकलादेकान्तवक्रतामुच्चैश्रवसश्चञ्चलतां कालकूटान्मोहनशक्तिं मदिराया मदं कौस्तुभमणेरतिलङ्घ्यमित्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता। न ह्यवंविधमपरमपरिचितमिह जगति किञ्चिदस्ति यथेयमलक्ष्मीः। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाशसन्दाननिष्पन्दीकृतापि नश्यति। उद्दामदर्पभटसङ्क्षोभासिलासिलतापञ्जरविधृतापयपक्रामति। मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुचष्टे। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमनुबुध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगरेणेव पश्यत एव नश्यति। अद्यापि रूढमन्दरपरिवर्तावसंभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनीसञ्चारणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिन्निर्भरमवभाति पदम्। अतिप्रयत्नावधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसिधारासु निषीदति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम्। अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोषमण्डलमपि मुञ्चति भूभुजम्। गङ्गेव वसुजनन्यपि सरङ्गवङ्कचञ्चला। दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः। पातालगुहेव तमोबहुला। द्विडिकयेव भीमसाहसैकहायनहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचेव दोर्शितानेकपुरुषोच्छाया स्खलयति सत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्। गुणवन्तमपविद्धमिव न स्पृशति। उदारसत्त्वमगङ्गलमिव न बहु मन्यते।

सुजनमनीमिसमिव न पश्यति। अभिजातमहिमेव लङ्घयति। शूरं कण्टकमिव परिहरति। दातारं तु स्वप्नमिव न स्मरति। विनीतं पातकिलमिव नोपसर्पति। मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथा हि। सततमुष्णमारोपयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। नीचराशिसम्भवापि तृष्णां संवर्धयति। ईश्वरतां दधानान्यधिपप्रकृतित्वमातनोति। चलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुकविपाका। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमस्थानापि खलजनप्रिया। वेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलं मुद्गसति। तथा हीयं संवर्धनवारिधारा तृष्णाविषवल्लीनां व्याधगीतिरिन्द्रियमृगाणां परामर्शधूमलेखा सच्चरितचित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णवल्मीकं घनमद पिशाचिकानां तिमिरौषधिर्न शास्त्रदृष्टीनां पुरःपताका सर्वविनयानामुत्पत्तिनिम्नगा क्रोधावेगग्राहाणामापानभूमिर्विषयमधूनां स्वर्गतिशाला भ्रूविकारनाट्यानामाचार्यकदरी दोषशीतिपाणामुत्सारणपेटलता वचनपुरुषव्याहारणामकालप्रबुद्ध गुप्तकलहुंम्फकाना विस्तरेणभूमिर्लोकापवादविस्फोटकानां प्रस्तावना कपटनाटकस्य कदलिका कामकरिणो वध्यशाला साधुमानस्य राहुजिह्वा धर्मेन्दुमण्डलस्य। न हि तं पश्यामि यो हयपरिचितमानया न निर्भग्नमुपगूढो योवा न विप्रलब्ध। मियतीमियमालेत्यगतापि चलति पुरुषमन्यपिण्डजाल। चरत्यु र्णापि विमलमते श्रुताप्यभिसन्धत्ते चिन्तितापि वञ्चयति।

एवंविधयापि चानया दुराचारया कयापि दैवचेन परि

गृह्यीता विकलवीभवन्ति राजान. । सर्वाविनयाधिष्ठानतां च गच्छन्ति । तथाहि । अभिषेकसमय एवैषां मङ्गलकलशजलैरिव प्रक्षाल्यते क्षात्त्रियम् । अग्निकार्यधूमेनेव मलिनीमर्यति हृदयम् । पुरोहितकुशाग्रसंमार्जनीभिरिवापनीयते क्षान्ति. । उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम् । आतपत्रमण्डलेनेवापचार्यते परलोकदर्शनम् । चामरपवनैरिवापाह्रियते सत्यवादिता । चन्दनैडरिवोत्सार्यन्ते गुणा । जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादा । ध्वजपटपल्लवैरिव परामृश्यते यश. । तथाहि । कैश्चिच्छ्रमवशशिथिलशकुनिगलपुटचपलाभि: खद्योतैर्मेयमुहूर्तमनोहराभिर्मनोरथैर्जनगर्हिताभि: सम्पद्भि प्रलोभ्यमाना धनलवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन दुष्टाश्वजेव रागावेशेन वाह्यमाना विविधविषयग्रासलालसै. पञ्चभिरप्यनेकलक्षसंख्यैरिवेन्द्रियैराक्रम्यमाना प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि यतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलतामुपयान्ति । ग्रहैरिव गृह्यन्ते । भूतैरिवाभिभूयन्ते । मन्त्रैरिवावेश्यन्ते । सर्वैरिवावष्टभ्यन्ते । वायुनेव विडम्ब्यन्ते । पिशाचैरिव ग्रस्यन्ते । मदनशरैर्मर्मभिहता इव मुखभङ्गसहस्राणि कुर्वते । मनोष्मणा पच्यमाना इव तिर्यक्परिभ्रमन्ति । अधर्मभग्नगत. य. पङ्गव इव परेण सञ्चार्यन्ते । मृषावादविपाकफलज्ञात मुखरोगा इवातिकृच्छ्रेण जल्पन्ति । सप्तच्छदतरव इव कुसुमरजोधिकारैरासन्नवर्तिनां शिरःशूलमुत्पादयन्ति । आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति । उलूकपिङ्गलोचना इव तेजस्विनो नेक्षन्ते । कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते । जातुषाभरणानीव सोष्मार्तं न सहन्ते । दुष्टवारणा इव महामालस्तम्भनि-चलीकृता न गुरूपदेशम् । तृष्णाविषमूर्छिता कनकमर्थमिव सर्वं

पश्यन्ति । इषव इव पानवञ्चितत्वेक्षणयाः परमैरिता विनाशयन्ति । दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्मदाकुलानि पातयन्ति । अकालकुसुमप्रलया इव मनोहराकृतयोऽपि लोकविनाशहेतवः । श्मशानाग्नय इवातिरौद्रभूतयः । तैमिरिका इवाकुरदर्शिनः । उपसृष्टा इव क्षुद्राधिष्ठितभवनाः । भ्रियमाणा अपि प्रेतपटहा इवोद्वेजयन्ति । चिन्त्यमाना अपि महापातकाधभयलाया इवोपद्रवमुपजनयन्ति । अश्रुदिवसमापूर्यमाणाः पापेनेवाधमातमूर्तयो भवन्ति । तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाच्छादिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति ।

अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितभालशुभेरास्यानलिनविकैर्धूतं विनोद इति मृगया श्रम इति पानं विलास इति प्रमत्तता शौर्यमिति दारपरित्यागोऽग्न्यलनितेति गुरुवचनाद्यवरिरणमपरभणेयत्वमित्याजितभृत्यता शुश्रोपलेब्यत्वमिति नृत्यगीतवाद्यवेश्याभिषङ्गी रसिकतेति महापराधानवकर्णनं महानुभावतेति परिभवसहत्वं क्षमेति स्वच्छन्दता प्रभुत्वमिति देवावमाननं महासत्त्वतेति बन्दिजनव्याहतिर्यश इति तरलतोत्साह इत्यविशेषज्ञताऽपक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विह्वलद्भिः प्रतारणकुशलैर्धूर्तैरमानुषोचितगीभिः स्तुतिभिः प्रतार्यमाणा विक्षिप्तचित्ता निश्चेतनतया तथैवेत्यात्मन्यारोपितालीकगुणा मिथ्याभिमानेन मर्त्यधर्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धक्षिप्तोचितचेष्टानुमावाः सर्वजनस्योपहास्यतामुपयान्ति । आत्मविडम्बनां चानुजीविना जनेन क्रियमाणामभिनन्दन्ति । मनसा देवतोपयोगप्रतारणादसद्भूतसम्भावनोपहताध्यान्तःप्रविष्टापरभुजङ्गयमियारमवाहुयुगलं सम्भावयन्ति । त्यक्तान्तरितृतीय-

लोचनं स्वललाटमाशङ्कन्ते । दर्शनप्रदानमप्यनुग्रहं गणयन्ति । दृष्टिपातमप्युपकारपक्षे स्थापयन्ति । सम्भाषणमपि संविभागमध्ये कुर्वन्ति । आशामपि वरप्रदानं मन्यन्ते । स्पर्शमपि पावनमाकलयन्ति । मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । न पूजयन्ति द्विजातीन् । न मानयन्ति मान्यान् । नार्चयन्त्यर्चनीयान् । नाभिवादयन्त्यभिवादनार्हान् । नाभ्युत्तिष्ठन्ति गुरून् । अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम् । जरावैक्लव्यमलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रज्ञापरिभवं हसन्ति सचिवोपदेशाय । कुप्यन्ति हितवादिने । सर्वथा तमभिनन्दन्ति तमालपन्ति तं पार्श्वे कुर्वन्ति तं संवर्धयन्ति तेन सह सुखमवतिष्ठन्ते तस्मै दद्यति तं मित्रतामुपनयन्ति तस्य वचनं शृण्वन्ति तन्न यर्पन्ति तं बहु मन्यन्ते तमात्मतामापादयन्ति योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति । किं वा तेषां साम्प्रतं येषामतिनृशंसमायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणमभिचारक्रियाक्षूरैकसहृदयाः पुरोधसो गुरवः परमिसन्धानपरा मन्त्रिणो उपदेष्टारो नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिं गौरणमेकमु शास्त्रेष्वभियोगः सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः ।

तद्यत्रायेऽतिकुटिलकपटचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन्मदामोहकारिणि च यौवने, कुमार, तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वद्भिः, यथा च न प्रतार्यसे कुशलैर्नास्त्राद्यसे भुजङ्गैर्नाचलुप्यसे सेवकलोकैर्न वञ्च्यसे धूर्तैर्न प्रलोभ्यसे वनिताभिर्न विडम्ब्यसे लक्ष्म्या न नर्त्यसे मदेन नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैर्न विकृष्यसे

रागेण नापह्नियसे स्तुवेन । कामं भवान्प्रकृत्यैव धीर । पित्रा च महता प्रयत्नेन कुमारोचितसंस्कार । तरलहृदयमप्रतिबुद्ध च मदयन्ति धनानि । तथापि भवद्गुणासन्तोषो मामेव मुखरीकृतवान् । इदमेव च पुन पुनरभिधीयसे । विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमिय दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा कल्याणै पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढा धुरम् । अवनमय द्विषता शिरासि । उन्नमय बन्धुवर्गम् । अभिषेकानन्तर च प्रारब्धदिग्विजय परिभ्रमन्विजितामपि तय पित्रा सप्तद्वीपभूषणा पुनर्विजयस्व वसुन्धराम् । अथ च ते कालप्रतापमारोपयितुम् । आरूढप्रतापा हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति ।

महाश्वेता-वृत्तान्तः ।

राजपुत्र, किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्याया पापाया जन्मन प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन । तथापि यदि महत्कुतूहल तत्कथयामि । श्रूयताम् ।

एतत्पायण, कल्याणाभिनिवेशिन श्रुतिविषयमापादितमेव यथा विबुधसुन्दर्यप्सरसो नाम कन्यका सन्ति । तासा चतुर्दश कुलानि । एक भगवत कमलयोनेर्मानस समुत्पन्नम् । अन्यद्ब्रह्मण वैदेश्य सम्भूतम् । अन्यदग्नेरुद्भूतम् । अन्यत्पवनात्मसूतम् । अन्यदमृतान्मन्थ्यमानादुत्थितम् । अन्यज्जलाज्जातम् । अन्य-

दर्कीकिरणेभ्यो निर्गतम् । अन्यत्सोमरश्मिभ्यो निष्पतितम् । अन्यद्भूमेरुद्भूतम् । अन्यत्सौदामिनीभ्यः प्रवृत्तम् । अन्यन्मृग्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनिरिष्टा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् । एवमेतान्येकत्र चतुर्दश कुलानि । गन्धर्वाणां तु ब्रह्मात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम् । अत्र मुनेस्तनयश्चित्ररथोनादीनां पञ्चशतानां 'भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः । स किल सकलभुवनप्रख्यातपराक्रमो भगवता समस्तशुभलीलामालालालितचरणनलिनेनाखण्डेन सुहृच्छन्देनोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमसिलतामरीचिनिचयमेचकितेन बाहुना समुपार्जितं शैशव एवावाप्तवान् । इतश्चानतिदूरे तस्यास्मद्भारतवर्षोत्तरेणानन्तरे किम्पुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः । तत्र च तद्भुजयुगपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति । तेनैव चेदं चित्ररथं नामातिमनोहरं काननं निर्मितम् । इदं चाच्छोदाभिधानमतिमहत्सरः खानितम् । अयं च भवानीपतिरुपबृंहितो भगवान् । अतिष्ठायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्याणां पञ्चानां ज्येष्ठो हंसो नाम जगद्विदितो गन्धर्वस्तस्मिन्द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान् । अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः । यत्तु तत्सोममयूखसम्भवमप्सरसां कुलं तस्माच्किरणजालानुसारगलितेन सकलेनैव रजनिकरकलाकलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिमकरकिरणावदातवर्णा कन्यका प्रसूता । तां च द्वितीयगन्धर्वकुलाधिपतिर्हंसो मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत् । सा तु भगवता

मकरकेतुनेव रतिं शरत्समयेनेव कमलिनीं हंसेन संयोजिता सदृशसमागमोपजनितामतिनिर्वृतिं मुदमुपगतवती । निखिलान्तःपुरस्वामिनी च तस्याभवत् । तयोश्च तादृशयोर्महारमनोरहर्निशं विगतलक्षणः शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना । तातस्त्वनपत्यतया सुतजन्मा तिरिक्तेन महोत्सवेन मदात्मानमभिनन्दितवान् । अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान् । सार्द्धं पितुर्भवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं सञ्चरन्त्यविदितस्नेहशोकायासमनोहरं शैशवमतिनीनयती । क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधुकरेण मधुकर इव मदेन नवयौवनेन पदम् ।

अथ सकलजीवलोकहृदयानन्ददायके मधुमासदिवसेऽहमन्वया सह मधुमालविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुन्दनायकह्लारमिदमच्छोदं सरः स्नानुमभ्यागमम् । अत्र च स्नानार्थमागतया भगवत्या पार्वत्या तटशिलातलेषु विरचितानि सद्भक्तिष्टीनि पांशुनिर्मलशरपदमण्डलानि मिलच्छुनिजनप्रणामप्रदक्षिणानि त्र्यम्बकप्रतिष्ठितानि चन्दमाना भ्रमरभरभुग्नगर्भकेसरजटैरकुसुमोपहारस्योर्ध्वं लतामण्डपः, परभृतनखकोटिपाटितकुड्मलागलविवरनिर्गलितमधुधार वपुष्पितोऽयं लवङ्गतरुः, दन्मदमधूकुलकुलकलभीतभुजङ्गमुक्तत्वचा शिशिरेयं चन्दनवीथिका, विकचकुसुमपुञ्जपातरुचितचन्द्रेयतापेक्षेलग्योमनेयं रागाशोका, चटुलकुसुमरजःपटलमग्नचराहंसपदलेखनातिरमणीयमिदं तीरतलम्, इति स्निग्धमनोहरतरोद्देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम् ।

एकस्मिंश्च प्रदेशे झटिति वसानिलेनोपनीतं निर्भरविकसितेऽपि काननेऽभिभूतान्यकुसुमपरिमलं विसर्पन्तमतिसुरभितयानुलिम्पन्तमिव तर्पयन्तमिव पूरयन्तमिव घ्राणेन्द्रियमङ्गमहिमिकया मधुकरकुलैरनुध्यमानमनाघ्रातपूर्वममानुषलोकोचितं कुसुमगन्धमभ्युजिघ्रम् । कुतोऽयमिति युगारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा

श्यामशिरःशफाङ्कमिव धूतव्रतम्, अयुग्मलोचनं वशीकर्तुकामं काममिव सनियमम्, उन्मिषन्त्या दृष्टिप्रभया कनकमयमिव तं प्रदेशं कुर्वाणम्, रोचनारसलुलितप्रतिसरसमानसुकुमारपिङ्गलजटम्, पुण्यपताकायमानया भस्मलाटिकया बालपुलिनलेखयेव गङ्गाप्रवाहमुद्दासमानम्, तपस्तडागकमलिनीमृणालेनेव यज्ञोपवीतेनालङ्कृतम्, एकेन सनालबकुलफलाकारं कमण्डलुमपरेण स्फटिकाक्षमालिकां करेण कलयन्तम्, मौञ्जमेखलागुणेन परिक्षिप्तजघनभागम्, अग्रगङ्गास्रोतोजलमत्तालिकेन जरच्चकोरलोचनपुटपाटलकान्तिना मन्दारवल्कलेनोपपादिताम्बरप्रयोजनम्, अलङ्कारमिव ब्रह्मचर्यस्य, यौवनमिव धर्मस्य, विलासमिव सरस्वत्या, स्वयंवरपतिमिव सर्वविद्यानां, सङ्केतस्थानमिव सर्वश्रुतीनां, निदाघकालमिव सापाढं, हिमसमयकालमिव स्फुटितप्रियङ्गुमञ्जरीगौरम्, मधुमासमिव कुसुमधवलतिलकभूतिभूषितमुखम्, आत्मानुरूपेण सचयशापेन देवताचनकुसुमान्युद्धिन्वता तापसकुमारेणानुगतम्, अतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम् ।

तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मित-

प्रभामिव वनश्रियः, मलयमारुतागमनाधेलाञ्जलिमिव मधुमासस्य, यौवनलीलामिव कुसुमलक्ष्म्याः, कृत्रिकातारा-सदृक्षानुकारिणीम्, अमृतबिन्दुनिस्यन्दिनीम्, अदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम् । अस्याः परिभूतान्यकुसुमामोदो नव्ययं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाहमचिन्तयम्—'अहो रूपातिशयनिष्पादनोपकरणकोपस्यादृष्टेपणता विधातुः । यत् त्रिभुवनाद्भुतरूपसम्भार भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरुत्पादितः । मन्ये च सकलजगन्नयनानन्दकरं शशिबिम्बं विरचयता लक्ष्मीलीलावासभवनानि कमलानि सृजता प्रजापतिना प्रथममेतदाननाकारकरणकौशलाभ्यास एव कृतः । अन्यथा किमिव हि सदृशवस्तुविरचनायां कारणम्। अलीकं चेदं यथा किल सकलाः कलाः कलायतो बहुलपक्षे क्षीयमाणस्य सुधांशुनामा राशिर्नवयतीति । ताः सदृक्षं गभस्तयः समस्ता चपुरिदमाविशन्तीति । कुतोऽन्यथा रूपापहारिणि क्षीणबहुले तपसि - यमेतस्येदं लाघवम्।' इति यद्विचिन्तयन्तीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधुकरीं परवशामकरोत् ।

उच्छ्वसितैः सह विस्मृतनिमेषेण किञ्चिदामुकुलितपद्मपत्रलक्षलतारायारोदरेण दक्षिणेन चक्षुषा सतृष्णमा-पिबन्तीव किमपि याचमानेव त्वदायत्तास्मीति वदन्तीवाभिमुखं हृदयमर्पयन्तीव सर्वात्मनानुप्रविशन्तीव तन्मयतामिव गन्तुमीहमाना मनोभवाभिभूतां मामवलोक्य करणाभिरुपयान्ती दोहृदयेऽवकाशमित्यर्थितामिव दर्शयन्ती हा हा किमिदमसाम्प्रतमतिदृपणमकुलकुमारीजनोचितमिदं मया प्रस्तुतमिति जानानाप्यप्रभवन्ती करणानां स्वकीयेव लिखितेवोत्की-

णेव संयतेव मूर्च्छितेव केनापि विधूतेव निष्पन्दसकलावयवा तत्कालायितभूतेनाथ पुम्भेनाकथितशिक्षितेनानारब्धेन स्वसंवेद्येन केवलं न विसान्यते किं तद्रूपसम्पदा किं मनसा किं मनसिजेन किमभिनयथौवनेन किमङ्गरागेणेवोपदिश्यमाना किमन्येनैव केनापि प्रकारेणाहमपि न जानामि कथं कथमिति तमतिचिरं व्यलोकयम् । उत्क्षिप्य नीयमानेव तरसमीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन पृष्ठतः प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नप्यात्मानमधारयम् । क्षान्तरं च मे ऽन्तर्मदनावष्टब्धमिव दातुमीहितस्खलनो निरीयुः श्वासमरुतः । स्वेदसलिलतयैवासोलितेवागलज्जा । मकरध्वजनिशितशरनिकरनिपातश्रस्तेवाकम्पत गात्रयष्टिः । तद्रूपातिशयं द्रष्टुमिव कुतूहलादङ्गेभ्यो निरगाद्रोमाञ्चजालकम् । अशेषतः स्वेदाम्भसा धौतस्वरूपमुज्ज्वलादिव हृदयमावशद्भाव ।

आसीच्च मम मनसि—'शान्तात्मनि दूरीकृतमदनव्यतिकरेऽस्मिन्जने मां निपतता किमिदमनार्यमाचरितमनेन मदनेन । एवं च नामतिमूढं हृदयमङ्गनाजनस्य यदनुरागविषयौन्मत्तामपि विचारयितुं नालम् । क्वेदमतिभास्वरं धाम तेजसां तदहं च । क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिस्पन्दितानि । नियतमयं मामेवं मकरकेतनश्छलेन विडम्बयमानामुपहसति मनसा । चित्रं चेदं यदहमेवमचिरादस्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुम् । धन्या अपि कन्यकाजनपामपहाय स्वयमुपयाताः पतीन् । अन्या अप्येवं दुर्विनीतेन मन्मथेनोन्मत्तीकृता नीता नार्यः । न पुनरहमेका यथा । कथमनेन क्षणेनाकारमात्रालोकनादुत्पन्नभूतमेवमत्यद्भुतमात्मनोपलभ्यन्त.करणम् । कालो हि गुणादच दुर्विचारतामारोपयति मदनस्य रूढेर्वा । यावदेव सचेतनास्मि यावदेव

च न परिस्फुटमेन विभाव्यते मे मदनकुश्चेष्टितलाघवमेतचा-
धेदवास्माप्रदेशाद्पसर्पणं श्रेयः । कदाचिदनभिमतस्मरवि-
कारदर्शनकुपितोऽय हन्यानिहा करोति माम् । भ्रूरक्रोधा हि
मुनिजनप्रकृति ।' इत्यवधार्यापसर्पणाभिलाषिणमवष्टम्भमभवम् ।
अथोपजनपूजनीया चेदं जातिरिति दृष्ट्वा तन्मदनाकुलदृष्टिमसरम्
अचलितपक्ष्ममालम् अदृष्टभूतलम् ईषदुल्लसितकपोलपत्रलेखम्
कर्णपोलमण्डलम् आलोलालकजालाराक्तकुसुमाक्तकर्णम् अं-
सदेशदोलायितमणिकुण्डलमस्मै प्रणाममकरवम् ।

अथ तरुणिमागायां मयि कुरङ्गचपलतया भगवतो मनोभुव, मदजनकतया च मधुमासस्य, अतिरमणीयतया च तस्य प्रदेशस्य अविनयबहुलतया चानिभवयौवनस्य, चञ्च-लप्रकृतितया चेन्द्रियाणाम् दुर्निवारतया च विषयाभिलाषा-णाम्, पराक्रमतया च मनोभुवः, तथा भवितव्यतया च तस्य तस्य चक्षुष, किं बहुना मम मन्दभाग्यदोषात्यास्य चेह-स्थस्य क्लेशस्य विहितवान् तमपि लज्जितसंगमलब्धैर्यैः अधीपस्थित पक्षकरतलस्खलन् । तदा तस्याप्यनिम-षागतं सहसं प्रत्युद्गच्छन्निव रोमाञ्चक प्रादुरभवत् । मदनकारसंभिन्नस्थिरत्व गतसो मार्गनिरोपविहतेरि पुर-प्रवृत्तं च । वेपथुपतीना पुलकन्मोद्भेदकत्व करतल-गलदुच्छ्वासता । द्विगुणेन कर्णान्तिकदृष्टसुकम्पजनो कपोल-दलारुद्धिनी समरहस्त इवेदमलिलजीवरजालिका । सद्-धैर्यमौनिवेदारितत्व चोसान्तारस्य गुरुजनसमयमिव तनुवेदमुपदर्शयतो लोचनयुगस्य जिलपिभिरंगुल्तानर्य-दृष्ट्याच्छोत्तलितमपहाय किंचिदवाग्यवनेरिव गगन-तरासगुप्तितेरुच्चल दृष्टि । तया तु तस्मात्तिमकट-या विदृश्या द्विगुणीकृतमदनविकार तरुणमरुमरीचिनयोर्व्यां वामप्यधस्यामन्दभवम् । प्रासप्रसरा चोपजुस्य तं छिती-

यमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्—'भगवन्, किमभिधानः कस्य चायं तपोधनयुवा । किन्नामनस्तरोरियमनंगतोदतंसीकृता कुसुममञ्जरी । जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्सुरासाधारणसौरभोऽयमाघ्रातपूर्वो गन्धः' इति । स तु मामीषद्विहस्यान्नवीत्—'बाले, किमनेन पृष्टेन प्रयोजनम् । अथ कौतुकमावहयामि । श्रूयताम् ।

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्तिरत्युदारतया सुरासुरसिद्धवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम । तस्यायमात्मज । पुण्डरीक इति नाम । इयं च सुरासुरैर्मथ्यमानात् क्षीरसागरादुद्गताः पारिजातनामा पादपस्तस्य मञ्जरी । यथा चैषा मर्तविरुद्धमस्य अवणसंसर्गमासादितवती तदपि कथयामि । अद्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्निर्गत्य सादरान्मधुमासलक्ष्मीदत्तललितहस्तावलम्बया बकुलमालिकामेधाजया कुसुमपल्लवग्रथितानिराजानुलम्बिनीभिः करठमालिकाभिर्निरन्तराच्छादितविग्रहया नवचूताङ्कुरकर्णपूर्या पुण्यालयपालमत्तया नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितः—'भगवन्, सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सदृशोऽयमलङ्कारः प्रसीद, क्रियताम् । इयमवतंसविलासदुर्ललिता समारोप्यतां अवणशिखरम् । भजतु सफलतां जन्म पारिजातस्य ।' इत्येवमभिदधानो चायमौत्सुक्यस्तुतिवादत्रपाधनमितविलोचनस्तामनाहूयैव गन्तुं प्रवृत्तः । मया तु तामनुयान्तीमालोक्य 'कौ योगः सखे, क्रियतामस्याः प्रणयपरिग्रहः' इत्यभिधाय बलादियमनिच्छतोऽप्यस्य कर्णपूरीकृता । तदेतत्कारुण्येन योऽयं या घेयं यथा चास्य अवणशिखरं समारूढा तत्सर्वमाघोषितम् ।'

इत्युक्तवति तस्मिन्नेव तपोधनयुवा किञ्चिदुपदर्शित-स्मितो मामवादीत्—'अयि कुतूहलिनि, किमनेन प्रश्नायासेन। यदि रुचितसुरभिपरिमला गृह्यतामियम्।' इत्युक्त्वा समुपस्तृत्यामीषाच्छ्रवणादपनीय कलैरलिकुलक्वणितैः मारब्ध समागमप्रार्थनामिव मदीये श्रवणपुटे तामकरोत्। मम तु तत्करतलस्पर्शलाभेन तत्क्षणमपरमिव पारिजातकुसुममर्तसस्थाने पुलकमासीत्। स च मत्कपोलस्पर्शेन तरलीकृताङ्गुलिजालकात्करतलादच्युतां लज्जया सह गलितामपि नाग्रासीत्। अथाहं तामसम्प्राप्तामेव भूतलसक्तां मालां गृहीत्वा सलीलं तदङ्गुलीपल्लवेनैकपदमहसुखमिवानुभवन्ती दर्शितापूर्वहारलतालीलां कण्ठाभरणतामनयम्।

इत्थम्भूते च व्यतिकरे छत्रमादिशी मामवोचत्—'भर्तदारिके, स्नाता देवी। प्रत्यासीदति गृहगमनकाल.। तत्किञ्चित्तं मज्जनविधि.' इति। अहं तु तेन तस्या वचनेन गन्धग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छया कथं कथमपि समाहृत्यमाणा तन्मुखान्नागवल्यामृतपङ्कमग्नामिव कर्णोत्पलकर्णिकाजालकलग्नामिव मदनशरशलाकाकीलितामिव सौभाग्यगुणस्यूतामिवातिकृच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम्। उच्चलितायां च मयि द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किञ्चित्प्रकटितप्रणयकोप इवावादीत्—

'सखे पुण्डरीक, नैतदनुरूपं भवत। क्षुद्रजनजुगुप्सित एव मार्ग.। धैर्यधना हि साधवः। किं यः कथिरमाहृत इव विक्लवीभवन्तमात्मानं न वेत्सि। कुतस्तवापूर्वोऽयमिन्द्रियोपप्लवो येनास्येवं कृतः। क्व ते तद्धैर्यम्। क्वासाविन्द्रियजयः। क्व तद्धृतित्वं चेतसः। क्व सा प्रशान्तिः। क्व तत्कुलक्रमागतं ब्रह्मचर्यम्। क्व सा सर्वविषयानभिष्व-

कता । क्व ते गुरूपदेशाः । क्व तानि श्रुतानि । क्व ता वैराग्यबुद्धयः । क्व तद्रूपभोगविद्वेषित्वम् । क्व सा मुग्धपराङ्मुखता । कासौ तपस्यभिनिवेशः । क्व सा सद्ज्ञानानुपयोगचिन्ता । क्व तथौचित्यानुशासनम् । सर्वथा निष्फला प्रज्ञा निर्गुणो धर्मशास्त्राभ्यासः, निरर्थकः संस्कारः, निरुपकारको गुरूपदेशविवेकः, निष्प्रयोजना प्रबुद्धता, निष्कारणं ज्ञानम् । यद्यत्र भवादृशा अपि रागाभिपङ्कैः कलुषीक्रियन्ते प्रमादैश्चाभिभूयन्ते । कथं करतलाङ्गुलिलामपहृतामच्छमालामपि न लक्षयसि । अहो विगतचेतनत्वम् । अपहृता नामेयम् । इदमपि तावदपठ्यमानमलयान्नार्यया निवार्यतां हृदयम् ।'

इत्येवमभिधीयमानश्च तेन किंकिंचकुपजातलज्ज इव प्रत्यवादीत्—'सखे वपिञ्जल, किं मामन्यया त्वमवगच्छसि । लाक्षारागमस्या मुग्धिनीलकन्यकाया मयैवामच्छमालाग्रहणापराधमिमम् ।' इत्यभिधायालीकक्रोपाक्रान्तेन प्रयत्नविरचितभीषणभ्रुकुटिभूषणेन मुखेन्दुना मामवदत्—'चपले, प्रदेशादस्मादितोऽमच्छमालामदत्त्वा पदात्पदमपि न गन्तव्यम्' इति । तच्च श्रुत्वाहमारभकण्ठाङ्गुल्यैकावलीम् 'भगवन्, गृह्यतामच्छमाला' इति मन्मुखासक्तदृष्टेर्गूढहृदयस्यास्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नालापि पुनः मनातुमयालम् । उत्थाय च कथमपि प्रयत्नेन निर्गच्छन्ती प्रतीपं नीयमाना सखीजनेन बलादेवगा सकृ तामेव चिन्तयन्ती स्वभवनमयासिषम् । गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि किमेकाकिन्यस्मि किं परिजनवतास्मि किं तूष्णीमास्मि किं प्रस्तुतालापास्मि किं जागर्मि किं सुप्तास्मि किं रोदिमि किं न रोदिमि किं नु खल्विदं किं सुखमिदं किमुत्करटेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोऽयं किं विप्लव एष किं नियोगः कालि रम्याणि

कान्यरक्षाणीति सर्वं नावागच्छम्। अधिशातमदनवृत्तान्ता च क्व गच्छामि किं शृणोमि किं पश्यामि किमालपामि कस्य कथयामि कोऽस्य प्रतीकार इति सर्वं च नाज्ञासिषम्। केवलमारूढ कुमारीपुरप्रासादं विलपन्ती च सखीजनं द्वारि नियारितोशेषपरिजनप्रवेशा, सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी, तामेव दिशं तरलनाथतया प्रसाधितामिव कुसुमितामिव महारत्नलिखितामिव॰

तद्वल्लभतया तप क्लेशाचापि रुद्धयन्ती, तत्प्रीत्येव गृहीतमौनव्रता, स्मरजनितपक्षपाता च तत्परिग्रहान्मुनिवेषस्याग्राम्यतां तदात्मतया यौवनस्य चारतां तच्छरणसम्पदात्मनो विजातकुसुमस्य मनोहरतां तापिनासार्थुरलोकस्य रम्यतां तद्रूपसम्पदा कुसुमायुधस्य दुर्जयतामध्यारोपयन्ती, दूरस्थस्यापि कमलिनीव सवितुः सागरवेलेव चन्द्रमसो मयूरीव जलधरस्य तदेवाभिमुखी, तथैव तां तद्विरहातुरजनविलोदुगमरक्षावलीमिवाच्छावलीं कण्ठेनोद्वहन्ती, तथैव च तया प्रस्तुतसङ्ख्यालापयैव कर्णलग्नया पारिजातमञ्जर्या तथैव च तेन तत्करतलस्पर्शसुखजन्मना कदम्बमुकुलकर्णपूरायमाणेन रोमाञ्चजालेन कण्टकितैककपोलफलका निस्पन्दमातिष्ठम्।

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सह गता स्नानायुमार्गात्। सा च पश्चाधिराद्विवागत्य तथावस्थितां शनैर्मामवादीत्—'भर्तृदारिके, यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरुच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता शुक्लदकुसुममञ्जरी स तस्माद् द्वितीयाद्यात्मनो रक्तदशनमालतीनिभृतपदः कुसुमितलतासन्तान॰

गहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतो भर्तृदारिकामुद्दिश्याप्राक्षीत्-'बालिके, कियं कन्यका कस्य वापत्यं किमभिधाना क गच्छति' इति। मयोक्तम्-'एषा खलु भगवतः श्वेतभानोरंशुसम्भूतायामप्सरसि गौर्यां समुत्पन्ना हंसस्य सकलगन्धर्वमुकुटमणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं हेमकूटाचलमभिप्रस्थिता।' इति कथिते च मया किमपि चिन्तयन्मुहूर्तमिव तूष्णीं स्थित्वा चिरतरमिमेषेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमभ्यर्थितामिव दर्शयन्पुनराह-'बालिके, कल्याणिनी तवायिसंवादिन्यचपला बालभावेऽप्याकृतिरियम्। तत्करोषि मे वचनमेकमभ्यर्थ्यमाना' इति। ततो मया सविनयसुपरचिताञ्जलिपुटया दर्शितादरमभिहितः-'भगवन्, कस्मादेवमभिधत्से। काहम्। महात्मानः सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकलमषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति किं पुनरालापम्। तद्विभ्रब्धमादिश्यतां कर्तव्यम्। अनुगृह्यतामयं जनः।' इत्येवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्वा मामभिनन्द्य निकटवर्तिनस्तमालपादपपल्लवमादाय निष्पीड्य शिलातले तेन गन्धगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकर्णिकाग्रनखशिखरेणाभिलिख्य 'इयं पत्रिका त्वया तस्मै कन्यकायै प्रच्छन्नमेकाकिन्यै देया' इत्यभिधायार्पितवान्।'इत्युक्ता च सा ताम्बूलभाजनादाकृष्य तामदर्शयत्। अहं तु तेन तत्सम्बन्धिनालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता श्रोत्राधिपत्येनापि रोमोद्गमानुमितसर्वाङ्गानुप्रवेशेन मदनावेशमन्येनेवावेश्यमाना तस्याः करतलादादाय तां वल्कलपट्टिकां तस्यामेमामभिलिखितामार्यामपश्यम्--

'दूरं मुक्तालतया विषसितया विप्रलोभ्यमानो मे ।
हंस इव दर्शितारो मानसजन्मा त्वया नीतः ॥'

अनया च मे दृष्ट्या, द्विड्मोहभ्रान्त्येव मनसुवर्मनो बहुल-निशयेवाभ्यस्य जिह्वोच्छित्त्येव मूकस्येन्द्रजालिकपिच्छिकये-वातरवदर्शिनो ज्वरप्रलापप्रवृत्त्येवासम्बद्धभाषिणो दुष्टनिद्रयेव विषविह्वलस्य लोकायतिकविद्ययेवाधर्मलब्धमन्दिरयेवोन्मत्तस्य दुरात्मशक्तियेव पिशाचग्रहस्य, दोषविकारोपचयः सुतरा-मक्रियत स्मरातुरस्य मे मनसः । येनाकुलीक्रियमाणा सरिदिव पूरेण विह्वलतामगमम् । तां च द्वितीयदर्शनेन कृतमहापुण्यामिवानुभूतसुरलोकवासामिव देवताधिष्ठिता-मिव लब्धवरामिव पीतामृतामिव समासादितत्रैलोक्य-राज्याभिषेकामिव मन्यमाना, सततसन्निहितामपि दुर्लभद-र्शनामिवातिपरिचितामप्यपूर्वामिव सादरमासापमाना, पार्श्वा-वस्थितामपि सर्वलोकस्योपर्यवस्थितामिव पश्यन्ती, कपोल-पोरलकलतामङ्गेषु च सोपग्रहं स्पृशन्ती, विपरीतमिव परिजनस्वामिसम्बन्धमुपदर्शयन्ती, 'तरलिके, कथय कथं स त्वया दृष्टः, किं किमभिहितासि तेन, कियन्तं कालमव-स्थितासि तत्र, कियदनुसरन्नस्मानसावागतः' इति पुनः पुनः पर्यपृच्छम् । अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिवसमत्यवाहयम् ।

अथ महीयसैव हृदयेन छुतरागसंविभागे लोहितायति गगनतलोपान्तावलम्बिनि रविबिम्बे, गैरिकगिरिसलिलप्रपात-पाटलेषु कमलवनेभ्यः समुत्थाय वनगजयूथेष्विव पुञ्जीभवत्सु भास्करकिरणेषु, गगनावतारविधामललालसानां हर्षह्रेषारव-प्रतिशब्देन सह निशति मेदगिरिगह्वरं यासरे, मुकुलितरक्त-पङ्कजपुटप्रविष्टमधुकरामलिषु रविविरहमूर्च्छेव मोलितेषु दि-यास्विव प्रारब्धनिमीलनासु पद्मिनीषु, आसीकृतसामान्य-

मृणालललताविचरनिङ्गालितानि परस्परहस्तान्यादाय विश-
त्सानेषु स्थाङ्गनासां युगलेषु, सा छत्रधारिणी समागत्या-
कथयत्—'भर्तृदारिके, तयोर्मुनिकुमारयोरन्यतरो द्वारि
तिष्ठति, कथयति चात्तमालामुपयाचितुमागतोऽस्मीति ।'

अहं तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशं समुपजातत्वरागमनाथाङ्क समाहूयान्यतमं कञ्चुकिनं 'गच्छ, प्रवेशयताम्' इत्यादिश्य प्रतिष्ठामम् । अथ मुहूर्तादिव तं तस्य, रूपस्येव यौवनं यौवनस्येव मकरकेतनं मकरकेतनस्येव वसन्तसमयं वसन्तसमयस्येव दक्षिणानिलम्, अनुरूपं स्वस्यापि कुमारकं कपिञ्जलनामानं जराभवतितस्य कञ्चुकिनोऽनुमार्गेण चन्द्रातपस्येव बालातपमागच्छन्तमपश्यम् । अन्तिकमुपगतस्य चास्य पर्याकुलामिव सविषादामिव शून्यमिश्रितमिवान्तर्गतामुलमाकारमलक्ष्यम् । उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपानयम् । उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावुपमृज्योत्तरीयांशुकपल्लवेनाव्यवधायां भूमावेव तस्यान्तिके समुपाविशम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरापातयत् । अहं तु विदिताभिप्राया इष्टमेव 'भगवन्, अत्यतिरिक्तेनमस्मच्छरीरादशङ्कितमाभिधी-यताम्' इत्यवोचम् ।

एवमुक्तश्च मया कपिञ्जलः प्रत्यवादीत्—'राजपुत्रि, किं ब्रवीमि । योग्य मे नाभिधेयविषयमवतरति अपया । क्व कन्दमूलफलाशी शान्तो वनवासनिरतो मुनिजनः । क्वायमनुपपान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलासलङ्कटो राजप्रायः प्रपञ्चः । सर्वमेवानुपपन्नमालोक्य किमारब्धं दैवेन । अयत्नेनैव खलूपहासास्पद-

मुताहो जटानां समुचितम् । किं तपसोऽनुरूपमाहोस्विदधर्मोपदेशाङ्गमिदम् । अपूर्वेयं विडम्बना । केवलमवश्यकथनीयमिदम् । अपर उपायो न दृश्यते । अन्या प्रतिक्रिया नोपलभ्यते । अन्यच्छरणं नालोक्यते । अन्या गतिर्नाकलिता । अकथ्यमाने च महाननर्थोपनिपातो जायते । प्राणपरित्यागेनापि रक्षणीया सुहृदस्य इति कथयामि । अस्ति भवत्या समक्षमेव स मया तथा निष्ठुरमुपदर्शितकोपेनाभिहित । तथा चाभिधाय परित्यज्य तस्मात्प्रदेशादुपजातमन्युरुत्सृष्टकुसुमावचयोऽन्यं प्रदेशमगमम् । अपयातायां भवत्या मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति सञ्जातचिन्तं प्रतिनिवृत्य त्वरितविग्रहस्तं प्रदेशं व्यलोकयम् । यावत्तत्र तं नाद्राक्षमासीच्च मे मनस्येवम्— किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन्गतो भवेत्, गतायां च तस्यां लब्धचेतनो लज्जमानो न शक्नोति मे दर्शनपथमुपगन्तुम्, आहोस्वित्तृणमिव परित्यज्य मां गत, इतान्यिष्यन्मामेव प्रदेशमन्यमित समाधित स्यात्।' इत्येवं विकल्पयन्किञ्चित्कालमतिष्ठम् । तेन तु जन्मन प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमान पुनरचिन्तयम्—'स कदाचिद्वैयस्खलनविलीत किञ्चिदनिष्टमपि समाचरेत् । न हि किञ्चिन्न क्रियते ह्रिया । तन्न युक्तमेनमेकाकिन कर्तुम् ।' इत्यवधार्यान्वेष्टुमादरमकरवम् । अन्विष्यंश्च यथायथा नापश्यं तं तथातथा सुहृत्स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानस्तत्तल्लतागहनानि चन्दनवीथिका लतामण्डपान्सर कूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टि सुचिरं व्यचरम् ।

अथैकस्मिन्सर सभीपवर्तिनि निरन्तरतया कुसुममय इव मधुकरमय इव परभृतमय इव मयूरमय इवातिमनोहरे ऽसन्तजन्मभूमिभूते लतागहने कृतावस्थानम्, उत्कृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव

प्रसुप्तमिव योगसमाधिस्थमिव, अतिनिःस्पन्दतया हृदय-निवासिनीं प्रियां द्रष्टुमन्तःप्रविष्टैर्निश्वासह्रासन्तापसन्त्रास-प्रलीनैरिव मनश्चोभप्रकुपितैरिवोन्मुक्तयं गतैरिन्द्रियैः शून्यी-कृतशरीरम्, श्यामकपोलशयनीकृतकरालतया समुत्सर्पद्भिरम-लैर्नखांशुभिर्विमलीकृतमच्छच्छचन्दनरसरुचिललाटिकमिव ललाटमुद्वहन्तम्, अचिरापनीतपारिजातकुसुमकर्णपूरतया सशेषपरिमलामोदलोभोपसर्पिणा स्खलितच्छलेन मदन-संमोहनमन्त्रमिव जपता मधुकरकुलेन सनीलोत्पलमिव स-तमालपल्लवामव श्रवणदेशं दधानम्, दक्षिणकरेण च स्फुरि-तनखकिरणनिकरं करतलस्पर्शसुखकणटकितामिव मुक्ता-वलीमविनयपताकामुरसि धारयन्तम्, मदनवशीकरणचूर्णेनेव कुसुमरेणुना तरभिराह्रन्यमानम्, आत्मरागमिव सङ्क्रामय-द्विरासन्नैर्नवैः चलिसैरशोकपल्लवैः स्पृश्यमानम्, आलिनि-बद्धनिषीयमानपरिमलैरपरि पतद्भिश्चम्पककुड्मलैस्तत्सगोत्रा-ख्यैरिव सधूमै कुसुमशरेण ताडयमानम्, अतिबहल-घनामोदमत्तमधुकरझङ्कारनिःस्वनैर्हुङ्कारैरिव दक्षिणानिलेन निर्भत्स्यमानम्, मदकलकोकिलकुलकोलाहलैर्वसन्तजयशब्द-कलकलैरिव मधुमासेनाकुलीक्रियमाणम्, प्रभातचन्द्रमिव पाण्डुतया परिगृहीतं, निदाघगङ्गाप्रवाहमिव कृशिमानमाग-तम्, अन्तर्गतानलं चन्दनविटपमिव ग्लायन्तम्, अन्यमि-वादृष्टपूर्वमिवापरिचितमिव जन्मान्तरमिवोपगतं रूपान्तरे-णेव परिणतम्, आविष्टमिव महाभूताधिष्ठितमिव ग्रहगृहीतमि-वोन्मत्तमिव छोलितमिवान्धमिव बधिरमिव मूकमिव, वि-लासमयमिव मदनमयमिव परायत्तचित्तवृत्तिं परां कोटि-मधिरूढं मन्मथावेशस्य, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम् ।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजा-तोच्छ्वासो धैर्यमालम्ब्य हृदयेनाचिन्तयम्—'एवं नामायमति-

दुर्विषहवेगो मकरकेतु, येनानेन क्षणेनायमीदृशमवस्थान्तरमेतादृशमुपनीत । कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशि. । अहो बत महच्चित्रम् । तथा नामायमा शैशवादीर्घप्रकृतिरस्खलितबुद्धिर्मम चान्येषां च मुनिकुमारकाणां सुहृद्गोष्ठीचरित आसीत् । अद्य त्वितर इव परिभूय ज्ञानमविगणय्य तप प्रभावमुन्मूल्य गाम्भीर्यं मन्मथेन जडीकृत । सर्वथा दुर्लभं यौवनमस्खलितम्' इति । उपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्यांसदेशावलम्बपाणिकृतमनुन्मीलितलोचनमेव 'सखे पुण्डरीक, कथय किमिदम्' इत्यपृच्छम् । अथ चिरसंमीलनाल्लग्नमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजातारुणभावमधुजलपटलपूरप्लावितमुद्रुपितमिव सवेदनमिव स्वच्छांशुकान्तरितरक्तकमलयुगच्छायं चक्षुरुन्मील्य मन्थरया दृष्ट्या सुचिरं निलोक्य भूमावततरं निधत्त्य लज्जाविनयैमाणविरलाक्षर 'सखे कपिञ्जल, विदितवृत्तान्तोऽपि किं मां पृच्छसि' इति कृच्छ्रेण शनै. शनैरवदत् । अहं तु तदाकर्ण्य तदवस्थैवाप्रतीकारविकारोऽयं तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्चर्चित. सर्वात्मना निवारणीय इति मत्वाऽभाषिषम्-'सखे पुण्डरीक, सुविदितमेतन्मम । केवलमिदमेव पृच्छामि । यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टम्, उत धर्मशास्त्रेषु पठितम्, उत धर्मार्जनोपायोऽयम्, उतापरस्तपसां प्रकार', उत स्वर्गगमनमार्गोऽयम्, उत मतरहस्यमिदम्, उत मोक्षप्राप्तियुक्तिरियम्, आहोस्विदन्यो नियमप्रकार' । कथमेतदुक्तं भवता मनसापि चिन्तयितुं किं पुनराख्यातुमीहितुं वा । किमनुद्धत इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मान नावबुध्यसे । मूढो हि मदनेनायास्यते । का वा सुखाशा साधुजननिन्दितेष्वेवंविधेषु प्राकृतजनबहुमतेषु विषयेषु भवत. । स खलु धर्मबुद्धया

विपलतावनं सिञ्चति कुवलयमालेति लिङ्गिशलतामालिङ्गति कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते रत्नमिति ज्वलन्तमङ्गारमभिस्पृशति मृणालमिति दुष्टवारणदन्तमुसलमुन्मूलयति मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः सुखबुद्धिमारोपयति। अधिगतविषयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि, यतो न निवारयसि प्रबलव्रजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि, न नियमयसि वा क्षुभितं मनः। कोऽयमनङ्गो नाम। धैर्यमवलम्ब्य निर्भर्त्सयतामयं दुराचारः।' इत्येवं वदत एव मे वचनमाक्षिप्य प्रतिपन्नान्तरालप्रवृत्तबाष्पवेगिकं प्रमृज्य चक्षुः करतलेन पाणौ मामवलम्ब्यावोचत्—'सखे, किं बहुनोक्तेन। सर्वथा स्वस्थोऽसि। आशीविषविषवेगाविषमाणामेतेषां कुसुमचापसायकानां पतितोऽसि न गोचरे। क्षुभ्यमुपदिश्यते परस्य। यस्य चेन्द्रियाणि सन्ति मनो वा वियते, य पश्यति वा शृणोति वा शृणवधारयति वा, यो वा शुभमिदं न शुभमिदमिति विवेकुमलम, स खलूपदेशमर्हति। मम तु सर्वमेवेदमतिदूरापेतम्। अवष्टम्भो ज्ञानं धैर्यं प्रतिसंख्यानमित्यस्तमितैषा कथा। कथमप्येवमेवायत्नविधृतास्तिष्ठन्त्यसवः। दूरातीतः खलूपदेशकालः। समतिक्रान्तो धैर्यावसरः। गता प्रतिसंख्यानवेला। अतीतो ज्ञानावष्टम्भसमयः। केन चान्येनास्मिन्समये भवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणं वा करणीयम्। कस्यान्यस्य वा वर्त्मनि मया स्थातव्यम्। को वापरस्त्वत्समो मे जगति बन्धुः। किं करोमि, यन्न शक्नोमि निवारयितुमात्मानम्। इयमनेनैव क्षणेन भवता दृष्टावस्था। तद्वत इदानीमुपदेशकालः। यावत्प्राणिमि तावदस्य कलशान्तोदितह्रादयदिनकरकिरणातपतीव्रस्य मदनसन्तापस्य प्रतिक्रियां क्रियमाणामिच्छामि। पश्यन्त इव मेऽङ्गानि। उत्कथ्यत इव हृदयम्।

प्लुष्यत इव दृष्टि । ज्वलतीव शरीरम् । अत्र यत्प्राप्तकालं तत्करोतु भवान् ।' इत्यभिधाय तूष्णीमभवत् ।

एवमुक्तोऽप्यहमेनं प्रायोधयं पुन-पुन । यदा शास्त्रोपदेशविशदै सनिदर्शनैः सेतिहासैश्च वचोभि सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णौ तदाहमचिन्तयम्—' अतिमूर्खिमयं गतो न शक्यते निवर्तयितुम् । इदानीं निरर्थकाः खलूपदेशाः । तत्प्राणपरित्राणेऽपि तावदस्य यतमाचरामि ।' इति कृतमतिरुत्थाय गत्वा तस्मात्सरसः सरसा मृणालिकाः समुद्धृत्य कमलिनीपलाशानि जललवलाञ्छितान्यादाय गर्भधूलिकषायपरिमलमनोहराणि च कुमुदकुवलयकमलानि गृहीत्वागत्य तस्मिन्नेव लतागृहशिलातले शयनमस्याकल्पयम् । तत्र च सुखनिषण्णस्य प्रत्यासन्नवर्तिनां चन्दनविटपिनां मृदूनि किसलयानि निष्पीड्य तेन स्वभावसुरभिणा तुषारशिशिरेण रसेन ललाटिकामकल्पयम् । अथ चरणतलादङ्गघर्षं चारचयम् । अभ्यर्णपादपस्फुटितवल्कलविवरशीर्णेन च कल्कचूर्णितेन कर्पूरेणुना स्वेदप्रतिक्रियामकरवम् । उरोनिहितचन्दनद्रवार्द्रवल्कलस्य स्वच्छसलिलसीकरनिकरलाविणा कदलीदलेन व्यजनक्रियामन्वतिष्ठम् । एवं च मुहुर्मुहुरन्यदन्यच्छिन्नदलशयनमुपकल्पयतो मुहुर्मुहुश्चन्दनलतामारचयतो मुहुर्मुहुश्च स्वेदप्रतिक्रियां कुर्वतः कदलीदलेनानवरतं वीजयतः समुदभून्मे मनसि चिन्ता—' नास्ति जन्तूनामसाध्यं नाम भगवतो मनोभुवः । क्वायं हरिण इव वनवासनिरतः स्वभावसुरभिः क्व च विविधविलासरतिगन्धर्वराजपुत्री महाश्वेता । सर्वथा न हि किञ्चिदस्य दुर्घटं दुष्करमनायत्तमकर्तव्यं वा जगति । दुरत्ययादृष्टपथं नयमवज्ञया विचरति । नायं केनापि प्रतिकूलयितुं शक्यते । का वा गणना सचेतनेषु, अपगतचेतनान्यपि संघटयि-

तुमल यद्यस्मै रोचते । तत्कुमुदिन्यपि दिनकरकरानुरागिणी भवति, कमलिन्यपि शशिकरद्वयमुज्झति निशापि ध्वान्तेन सह मिश्रतामेति, ज्योत्स्नाप्यन्धकारमनुवर्तते, छायापि प्रदीपाभिमुखमवतिष्ठते, तडिदपि जलदे स्थिरता व्रजति जरापि यौवनेन सञ्चारिणी भवति । किं वा तस्य दुःसाध्यमपरम्, एवविधो येनायमगाधगाम्भीर्यसागरस्तृणायन्नद्युता मुपनीत । क्व तत्तप, कियमवस्था । सर्वथा निष्प्रतीकारे यमापदुपस्थिता । किमिदानीं कर्तव्यम् । किं वा चेष्टितव्यम् । का दिश गन्तव्यम् । किं शरणम् । को वोपाय, क उदाय, क प्रकार, का युक्ति, क समाधय, येनास्यासव सन्धा र्यन्ते । केन वा कौशलेन कतमया वा युक्त्या कतरेण वा प्रकारेण केन वाचष्टम्भन कया वा प्रज्ञया कतमेन वा क्षमा श्वासबेनाय जीवेत् ।' इत्येते चान्ये च मे विषण्णहृदयस्य सङ्कल्पा प्रादुरासन् । पुनश्चाचिन्तयम्—' किमनया ध्यातया निष्प्रयोजनया चिन्तया । प्राणास्तावद्रक्ष्या येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीया । तेषा च तत्क्षमागममेकमपहाय नास्त्यपर सरक्षणोपाय । बालभावादप्रगल्भतया च तया विरुद्धमनुचितमुपहासमिवात्मनो मदनव्यतिकर मन्यमानो नियतमेकोच्छ्वासावशेषजीवितोऽपि नाय तस्या स्वयमाभिगमनेन पूरयति मनोरथम् । अकालान्तरक्षमश्चायमस्य मद नविकार । ततमतिगर्हितनाकृत्येनापि रक्षणीयात्मन्यन्त सुहृदसून्साधय । तदतिदुष्करमकर्तव्यमप्येतदस्माकमवश्य कर्तव्यतामापादितम् । किं चान्यत्क्रियते । का वान्या गति । सर्वथा प्रयामि तस्या सकाशम् । आवेदयाम्येतामवस्थाम् । इति चिन्तयित्वा कदाचिदनुचितव्यापारप्रवृत्त मा विज्ञाय सञ्जातलज्जो निवारयंदिवानिवेद्यैव तस्मै तत्प्रदेशात्सव्याजमु त्थायागतोऽहम् । तदेवमवस्थिते यदत्रावसरप्राप्तमीदृशस्य

चानुरागस्य सहशमकस्मादागमनस्य चानुरूपमात्मनो वा समुचित तन्न प्रभवति भवती ।' इत्यभिधाय किमियं वदयतीति मन्मुखादाकृष्टिलूर्णमासीत् ।

अहन्तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना, सर्वान्दानामुपरि वर्तमाना, सर्वमनोरथानामग्रमिवाधिरूढा, सर्वाङ्गसचानामतिभूमिमिवाधिशयाना, तत्कालोपजातया लज्जया किञ्चिदवनम्यमानवदनत्वादस्पृष्टकपोलोद्ग्रन्थितैरिवोपर्युपरिपतनानुबन्धदर्शितमालाक्रमैरप्रासपक्ष्मसंश्लेषतयोपजातस्निग्धभैरवमलैरानन्दबाष्पजलबिन्दुभि स्वर्द्धिरोद्यमानग्रहपंग्रसरा तत्क्षणमचिन्तयम्— दिष्ट्या लाब्धयमनङ्गो मामिव तमप्यनुबध्नाति । यत्नलभ्यमनेन मे सन्तापयतापि क्रियताप्यशेन दर्शितानुकूलता । यदि च सत्यमेव तस्येदृशी दशा वर्तते तत किमिव नोपकृतमनेन, किं वा नोपपादितम्, को वानेनापर. समानो बन्धु । कथ वा कपिञ्जलस्य स्वप्नेऽपि चिंतया भारती प्रशान्ताकृतेरस्माद्धृदयान्निष्कामति । इत्थभूत किं मयापि प्रतिपत्तव्यम् । तस्य वा पुर किमभिधातव्यम् ।' इत्येव विचार्यत्वरया पव प्रविश्य ससम्भ्रमा प्रतीहारी मामकथयत्— भर्तृदारिके, त्वमस्वस्थशरीरेति परिजनादुपलभ्य महादेवी प्रासा' इति । तच्च श्रुत्वा कपिञ्जलो महाजनसम्मर्दभीरु सत्वरमुत्थाय 'राजपुत्रि, महानयमुपस्थित कालातिपातो भगवांश्च भुवनत्रयचूडामणिरस्तमुपगच्छति दिवसकरस्तद्गच्छामि. स्वयाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपचितोऽञ्जलिरेष मे परमो विभव इत्यभिधाय प्रतिनिवृत्तकालममतीक्ष्यैव पुरोयायिनाम्याया प्रविश्यता वनकदेशलताकरेण प्रतीहारीजनेन कञ्चुकिलोकेन गृहीतताम्बूलकुसुमपटवासाङ्गरागेण चामरद्वयग्रपाणिना खड्गनिरातपधिरचामनवर्षवरकलमूकानुगतेन परिजनेन सर्वत. संरुद्धे

द्वारदेशे कथमप्यचालनिर्गमः प्रयत्नौ । अम्बा तु मल्लमीपमागत्य सुचिरं स्थित्वा स्वभवनमयासीत् । तथा तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति शून्यहृदया सर्वं नालक्षयम् । गतायां च तस्यामस्तमुपगते भगवति हारीतद्युतिवाजिनि सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि सचिवरि, क्षोहितायमाने पश्चिमाशामुखे, हरितायमानेषु कमलवनेषु, नीलायमाने पूर्वदिग्भागे, पातालपङ्कलुपेण महाप्रलयजलधिपय:पूरेणेव तिमिरेणावष्टभ्यमाने जीवलोके, किङ्कर्तव्यतामूढा तामेव तरलिकामपृच्छम्—'अयि तरलिके, कथं न पश्यसि दृढमाकुलं मे हृदयमतिपत्तिविह्वलानि चेन्द्रियाणि । न स्वयमगवापि कर्तव्यमलमस्मि ज्ञातुम् । उपदिशतु मे भवती यदत्र साम्प्रतम् । अयमेवं त्वत्समक्षमेवाभिधाय गत कपिञ्जलः । यदि तावदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवष्टभ्य विनयमचिन्तयित्वा जनापवादमतिक्रम्य सदाचारमुल्लङ्घ्य शीलमवगणय्य कुलमङ्गीकृत्यायशो लगान्धधूर्तिलनुज्ञाता पितानुमोदिता मात्रा स्वयमुपगम्य ग्राह्यामि पाणिमेवं गुरुजनातिक्रमादधर्मो महान् । अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरोम्येवमपि प्रथमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणयभङ्गभङ्ग, पुनरपरं यदि कदाचित्तस्य जीवितस्य मत्कृतादाशाभङ्गात्प्राणविपत्तिरुपजायते तदपि सुनिजनपथजनितं महदेनो भवेत् ।' इत्येवमुच्चारयन्त्यामेव मय्यासन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन वसन्तयनराजिरिव कुसुमरजसा धूसरतां वासरश्री रिणयासीत् । शनैः-शनैश्चन्द्रदर्शनान्मन्दस्मितायां दशनप्रभेव ज्योत्स्ना निष्पतन्ती निशाया मुखशोभामकरोत् । तदनु रसातलादवतीर्णमुदयोंदूगच्छता शेषफणामण्डलेनेव रजनीकरबिम्बेनाराजत

रजनी । क्रमेण च सकलजीवलोकानन्ददेन कामिनीजनवल्लभेन किञ्चिदुन्मुक्तधवलिमाभेन मकरध्वजबन्धुभूतेन समुपारूढगगणामृतमयेन यौवनेनेवारोहता शशिना रमणीयतामनीयत यामिनी ।

अथ नं प्रत्यासन्नसमुद्रविद्रुममञ्जरीपाटलितमिवाभिनवोदयरागलोहितं रजनिकरमुदितं विलोक्यान्तर्ज्वलितमदनानलाध्यन्धकारितहृदया तरलिकोत्सङ्गविधृतशरीरापि मन्मथहस्तवर्तिनी चन्द्रगतनयनापि मृत्युमालोकयन्ती तत्क्षणमचिन्तयम् - 'एकत्र खलु मदनमधुमासमलयमारुतप्रभृतयः समस्ताः, एकत्र चायं पापकारी चन्द्रहतको न शक्यते सोढुम । दुर्मतिदुर्विपक्षभवनवेदनातुरं च मे हृदयम । अस्य खोट्टमनमिदं सदाहज्वरप्रस्तस्याङ्गारवर्षः शीतार्तस्य तुषारपातो विषस्फोटमूर्च्छितस्य कृष्णसर्पदंशः ।' इत्येवं विचिन्तयन्तीमेव चन्द्रोदयोपनीता कमलवनम्लानिनिद्रेव मूर्च्छा मां निमीलितलोचनामकार्षीत् । अचिरेण च सम्भ्रान्ततरलिकोपनीताभिश्चन्दनचर्चाभिरालवृन्तानिलैश्चोपलब्धसंज्ञा तामेवाकुलाकुलां मूर्तेनेवाधिष्ठितां विषादेन मलयाद्रिविधूतसचन्द्रकान्तमणिशलाकामर्थिच्छिन्नबाष्पजलधारान्धकारितमुखीं स्वतीं तरलिकामपश्यम् । उन्मीलितलोचनां च मां सा कृतप्रणामा चन्दनगर्भाङ्गेन करयुगलेन वक्षोञ्जलिग्वादीत् - 'भर्तृदारिके, किं लज्जया गुरुजनापेक्षया वा । प्रसीद, प्रेक्षय माम् । आनयामि ते हृदयदयितं जनम् । उत्तिष्ठ स्वयं वा तत्र गम्यताम् । अतः परमसमर्थाहि सोढुमिमं प्रबलचन्द्रोदयविजृम्भमाणोत्कलिकाशतमुदधिमिव मकरचिह्नम् ।' इत्येवंवादिनीं तामवोचम् - उन्मत्ते, किं मन्मथेन । नन्वयं सर्वविकल्पानपहस्तयोपायदर्शनान्युन्सारयन्स्वयंनन्तरायानन्तरयन्सर्वसन्देहानपनयन्सर्वशङ्कातिर-

स्कुर्वल्लज्जामुन्मूलयन्स्वयमभिगमनलाघवदोषमाकुंचन्कालातिपातं परिहन्नागत एव कृत्योस्तस्यैव वा सकाशं नेता कुमुदबान्धव: । तदुत्तिष्ठ यथाकथञ्चिदनुगमनेन जीविता सम्भावयामि हृदयदयितमायासकारिणं जनम ।' इत्यभिधाना मदनमूर्च्छाखेदविह्वलैरङ्गैः कथञ्चिदवलम्ब तामेवोदतिष्ठम् । उच्चलितायाश्च मे दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं लोचनम् । उपजातशङ्क चाचिन्तयमिदमपरं किमप्युपचिक्षिप देवेनति ।

अथ नातिदूरोद्गतेन त्रिभुवनप्रासादमहाप्रणालानुकारिणा सुधालिलिप्सूनिव वद्धता चन्दनरसनिर्झरनिकरेणेव क्षरता श्वेतगङ्गाप्रवाहसहस्राणीव घमताभ्रुतसागरपूरानिवोद्गिरता चन्द्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनाभ्यन्तराले, श्वेतद्वीपनिवासमिव सोमलोकदर्शनसुखमेवानुभवति जगे, प्रतिभवनमङ्गनाजनेन विकचकुसुमगन्धैश्चन्दनोदकैरुपक्षिप्यमाणेषु चन्द्रोदयेषु, प्रतिकुमुदमावद्धमधुकरमण्डलासु प्रबुध्यमानासु भवनदीर्घिकाकुमुदिनीषु, शशिमणिप्रणालनिर्झरे प्रमोदमुखरमयूरवरम्ये प्रदोषसमये गृहीतविविधकुसुमताम्बूलाङ्गरागपटवासचूर्णया तरलिकयानुगम्यमाना तेनैव मूर्च्छानिहितेन किञ्चिदाश्यानचन्दनललाटिकालग्नधूसराकुलालकेन चन्दनरसचर्चाङ्गरागवेषेणाङ्गेन तथैव च तया कण्ठस्थितया तमालिया श्रवणशिखरचुम्बिन्या च पारिजातमञ्जर्या पद्मरागरत्नरश्मिनिर्मितेनेव रक्तांशुकेन कृतशिरोवगुण्ठना केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाण तस्मात्प्रासादशिखरादवातरम् ।

अवतीर्य च पारिजातकुसुममञ्जरीपरिमलाकृष्टेन रिक्तीकृतोपधानेन कुमुदवनान्यपहाय धावता मधुकरजालेन नीलपटावगुण्ठनविभ्रममिव सम्पादयतानुधाव्यमाना प्रमदजनप-

च्छाँरेण निर्गत्य तत्समीपमुदचलम् । प्रयान्ती च तरलिकाद्वितीयमपरिजनमात्मानमवलोक्याचिन्तयम्—'प्रियतमाभिसरणप्रवृत्तस्य जनस्य किमिव दुःखं बाह्येन परिजनेन। नन्वेत एव परिजनलीलामुपदर्शयन्ति। तथा हि। समारोपितशरासनासक्तसायकोऽनुसरति कुसुमायुध। दूरप्रसारितकरः कथयति शशी। प्रस्खलनभयात्पदे पदेऽवलम्बते राग। लज्जा पृष्ठत कृत्वा पुर सहेन्द्रियैर्धावति हृदयम्। निश्चय मारोप्य नयत्युत्कण्ठा' इति। प्रकाश चावदम्—'अयि तरलिके, अपि नाम मामिवायमिन्दुहृतक्स्तमपि कलैर्मृगकचग्रहाकृष्टमभिमुखमानयेत्।' इत्येवंवादिनी च मां सा यिह्स्यान्नयेत्—भर्तृदारिके मुञ्चामि। किमस्य तेन जनेन। अयमात्मनैव तावन्मदनातुर इव भर्तृदारिकाया लाल्लाट्यचेष्टाः करोति। तथा हि। निर्मलनखलक्ष्मश्रुति पादयो पतति। मृणालवलयमवलान्करान्धत्ते। केतकागर्भकेसरधूलिधूसरपादः कुमुदसरस्यवगाहते। सलिलसीकराद्रीक्रियमाणान्केशान्मृशति। क्षिपति विघटितचक्रवाकमिथुनानि कमलवनानि।' एतैश्चान्यैश्च तत्कालोचितैरालापैस्तया सह तमुद्देशमभ्युपागमम्। तत्र च मार्गलताकुसुमरजोधूसर चरणयुगलं कैलासतटाच्चन्द्रोदयप्रसूतचन्द्रकान्तमणिप्रस्रवणे प्रक्षालयन्ती यस्मिन्प्रदेशे स आस्ते तस्मिन्नेव सरस पश्चिमे तटे पुण्डरीकेण खण्डितध्वानि विप्रकर्षात्प्रतिव्यक्तमुपालक्षयम्।। (*) दक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशङ्का तेन सुतरामवदीर्णहृदयेव किमप्यनिष्टमन्त कथयतेव विषण्णेनान्तरात्मना 'तरलिके, किमिदम्' इति सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम्।

अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादं 'हा हतोऽस्मि, हा दग्धोऽस्मि, हा वञ्चितोऽस्मि, हा किमिद

मापतितं किं वृत्तम्, उत्सन्नोऽस्मि, दुरात्मन्मदन पिशाच पाप निर्घृण किमिदमकृत्यमनुष्ठितम, आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते किमेतेन तेऽपकृतम्, आः पाप दुश्चरित चन्द्रचाण्डाल कृतार्थोऽसीदानीम्, अपगतदाक्षिण्य दक्षिणानिलहृतक पूर्णस्ते मनोरथाः कृतं कर्तव्यं वहेदानीं यथेष्टम्, हा भगवच्छुतकेतो पुत्रवत्सल न वेत्सि मुपितमात्मानम्, हा धर्म निष्परिग्रहोऽसि, हा तपो निराश्रयमसि, हा सरस्वति विधवासि, हा सत्य अनाथमसि, हा सुरलोक शून्योऽसि, सत्रे प्रतिपालय मामहमपि भवन्तमनुयास्यामि न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी, कथमपरिचित इवाहपूर्व इवाद्य सोमेकपद उत्सृज्य प्रयासि, कुतस्त्वयमतिनिष्करुणा, कथय त्वदृते क्व गच्छामि कं याचे कं शरणमुपैमि, अन्धोऽस्मि संवृत्तः, शून्या मे दिशो जाता निरर्थकं जीवितम् अप्रयोजनं तपो निःसुखाश्च लोकाः, केन सह परिभ्रमामि, कमालपामि, उल्लिख देहि मे प्रतिवचनम्, क्व तन्ममोपरि सुहृत्प्रेम क्व सा स्मितपूर्वाभिभाषिता च' इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम् ।

तच्च श्रुत्वा पतितैरिव प्राणैर्दूरादेव मुक्तैकतारक्रन्दा सरस्तीरलतासक्तिक्षुट्यमानांशुकोत्तरीया यथाशक्ति त्वरितैरुल्लातत्तमविषमभूमिभागविन्यस्तैः पादमक्षेपैः प्रस्खलन्ती पदे पदे कनाप्युत्तिप्य नीयमानेव तं प्रदेशं गत्वा सरस्तीरसमीपवर्तिनि शिशिरसीकरासारस्नाविणि शशिमणिशिलातले विरचितं कुमुदकुवलयकमलविविधवनकुसुमसुकुमारं कुसुममशरसायकमयमिव शयनमाधिशयानम्, अतिनिष्पन्दतया मत्पदशब्दमिवाकर्णयन्तम्, अन्तःक्षोपशमितमदनसन्तापतया तत्क्षणलब्धसुखमसुप्तमिव, मनःक्षोभभयादिवोच्छ्वासनिरोधमाचरितमिव, अतिश्रस्फुरितभ्रमेण 'त्वत्कृते ममेय-

मवस्था' इति कथयन्तमिवाधरेण, इन्दुक्षेपपरिवर्तितदेहतया पृष्ठभागनिपतितैर्मदनदहनविच्छलहृदयन्यस्तनखमयूखच्छलेन च्छिद्रितमिव शशिकिरणै, 'मत्ता प्रियतरस्तवापरो जनो जात' इति कुपितेनेव जीवितेन परित्यक्तम्, मन्मथव्यथया सहैतानसून्स्वयमिवोत्सृज्य निश्चेलनतासुखमनुभवन्तम्, श्रियत रोदनाताम्रेण 'कठिनहृदये, दर्शनमात्रकेणापि न पुनरनुगृहीतोऽयमनुगतो जन' इति स्वगणयं मामुपलभमानमिव चक्षुषा, किञ्चिद्विधृताधरतया जीवितमपहर्तुमन्त प्रविष्टैरिवेन्दुकिरणैर्निश्चेष्टदर्शनांशुभिर्भवलितपुरोभागम्, मन्मथव्यथाधिष्ठितमानहृदयनिहितेन घामेन पाणिना 'प्रसीद प्राणैः समं प्राणलमेन गन्तव्यम्' इति हृदयस्थितां मामिव धारयन्तम्, इतरेण च नखमयूखदन्तुरतया चन्दनमिव स्रवतोरानीकृतेन चन्द्रातपमिव निवारयन्तम्, अन्तिकस्थितेन चाचिरोद्गत-जीवितमार्गमिवोद्भवितुं विलोकयता तप सुहृदा कमण्डलुना समुपेतम्, कण्ठाभरणीकृतेन च मृणालवलयेन रजनिकर-किरणपाशेनेव संयम्य लोकान्तरमुपनीयमानम्, कपिञ्जलेन महता नादेनाह्वयमिवोर्ध्वहस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तं ततक्षणापक्रान्तजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा काहमगमं किमकरवं किं व्यवसितमिति, सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन् क्षणे किमतिकठिनतयास्य मूढहृदयस्य किमनेकदुःखसहस्रसंहिम्नुतया हृतशरीरकस्य किं विहितया दीर्घशोकस्य किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य किमेकान्तवामतया दुरात्मनो मन्मथदूतकस्य केन हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती । केवलमतिचिरालब्धचेतना दुःखभागिनी

वह्नाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमान-
मपश्यम्। अश्रद्धाना चासम्भावनीयं तत्तस्य मरणमात्मनश्च
जीवितमुत्थाय 'हा हा किमिदमुपनतम्' इति मुक्तार्तनादा, 'हा
आर्य, हा तात हा सख्यः' इति व्याहरन्ती, 'हा नाथ जीवित-
निबन्धन श्वाचक्ष्व क्व मामेकाकिनीमशरणामकरुण विमुच्य
यासि, पृच्छ तरलिकां त्वत्कृते मया यादृशीतायस्था युगस-
हस्रायमाणः कृच्छ्रेण नीतो दिवसः, प्रसीद सकृदप्यालप
दर्शय भक्तवत्सलतामीषदपि विलोकय पुरः, मे मनोरथम्,
आर्तास्मि भक्तास्म्यनुरक्तास्म्यनाथास्मि बालास्म्यगतिकास्मि
दुःखितास्म्यनन्यशरणास्मि मदनपरिभूतास्मि किमिति न
करोषि दयां कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां
वा नाज्ञायामादृतं कस्मिन्वा त्वदनुकूले नाभिरतं येन कुपितो
दासजनमकारणात्परित्यज्य व्रजस्व विभेषि लोकान्नाम, अली-
कानुरागप्रतारणकुशलया किं वा मया वामया पापया याद्-
मद्यापि प्राणिमि, हा हतास्मि मन्दभागिनी, कथं मे न त्वं न
तातो न विनयो न बन्धुवर्गो न परलोकः, धिङ्मां दुष्कृतका-
रिणीं यस्याः कृते तवेयमीदृशी दशा घटते, नास्ति मत्सदृशी
नृशंसहृदया यादृमेवंविधं भवन्तमुत्सृज्य गृहं गतवती, किं
मे गृहेण किमम्बया किं वा तातेन किं बन्धुभिः किं परिजनेन
वा, कमुपयामि शरणम्, अपि देव दर्शय दयां विलापयामि त्वां
देहि दयितदक्षिणाम्, भगवति भवितव्यते कुरु कृपां पाहि
वनितामनुथाम्, भगवत्यो वनदेवताः प्रसीदत प्रयच्छतास्य
प्राणान्, अयि वसुन्धरे, सकललोकानुग्रहजननि रजनि किमर्थं
नानुकम्पसे, तात कैलास शरणागतास्मि ते दर्शय दयालुताम्'
इत्येतानि चान्यानि च व्याक्रोशन्ती, कियद्वा स्मरामि ग्रह-
गृहीतेवाश्लिष्टयोन्मत्तेव भूतोपहतेव व्यलपम्। उपर्युपरिपरि-
पतितनयनजलधारानिकरच्छलेन विलीयमानेव द्रवतामिव

नायमाना जलाकारेणेव मीक्ष्यमाणा, प्रलापाक्षरैरपि दशन-मयूरशिखरानुगततया साधुवादैरिव लिप्यलब्धि शिरोरुहैर-ध्याविरलविगलितकुसुमलया मुक्ताफलजलबिन्दुभिरिवाम-रैरपि प्रकृतविमलमणिकिरणाश्रुतया प्रदक्षिणैरियोपेता, तज्जीवितायेवात्ममरणाय स्पृहयन्ती, मृतस्यापि सजीवमना हृदय प्रवेष्टुमिवेच्छन्ती, करतलेन कपोलयोराश्यानचन्दन श्वेतजटामूले च ललाटे लिखितसरसिरुहयोश्चासयोर्मृणालय-ष्टिलतावल्लुलितकमलिनीपलाशावगुण्ठिते च हृदये परामृशन्ती, 'पुण्डरीक निष्ठुरोऽस्येवमप्यातीं न गणयसि माम्' इत्युपालभ-माना, मुहुर्मुहुरेनमञ्जनयं मुहुर्मुहु पर्यचुम्बं मुहुर्मुहु करठे गृहीत्वा व्याक्रोशम्। 'आ पाप त्वयापि मत्प्रत्यागमनकालं यावदस्यासवो न रक्षिता' इति तामेकावलीमगृह्णम्। 'अयि भगवन्प्रसीद प्रत्युज्जीवयैनम्' इति मुहुर्मुहु कपिञ्जलस्य पादयोरपतम्। मुहुर्मुहुश्च तरलिका करठे गृहीत्वा प्रारुदम्। अद्यापि चिन्तयन्ती न जानामि तस्मिन्काल कुतस्तान्यचि-न्तितान्यशिक्षितान्यनुपदिष्टान्यदृष्टपूर्वाणि मे इतपुण्यायाः कृपणानि चाटुसहस्राणि प्रादुरभवन्कुतस्ते प्रलापा कुत-स्तान्यतिकरुणानि चैकैलव्यरहितानि। अन्य एव स प्रकार। प्रलयोर्मय इवोदतिष्ठन्नन्तर्बाष्पवेगानाम्। जलयन्त्रा-णीवामुच्यन्ताश्रुप्रवाहाणाम्। 'प्रगृह्य इव निरगच्छ प्रलापा-नाम्। शिखण्डलतानीवाधर्यन्त दुःखानाम्। प्रसृतय इवोद-पाद्यन्त मूर्छानाम्।

ततश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया त-च्चदृङ्मुखिलम्य तरलिकामब्रवम्—'अम्बुत्तिष्ठ निष्ठुरहृदये कि-यन्नोदिषि। काष्ठान्याहृत्य विरचय चिताम्। अनुसरामि जी-वितेश्वरम्' इति। अत्रान्तरे झटिति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य केयूरकोटिलग्नममृतफेनपिण्डपाण्डुरं पवन-

तरलमंशुकोत्तरीयमाकर्षन्नुभयकर्णान्दोलितकुण्डलमणिप्रभा-

मुदकर्णपूरः कुङ्कुमपत्रलतालाञ्छितांसदेशः कुमुदधवलदन्तो महाप्रमाणः पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः स्वच्छतारिण्यवलेन देहप्रभाविलासेन क्षालयन्निव दिगन्तरायामोदिता च शरीरतः क्षरता शिशिरेण शीतज्वरमिव जनयताभ्युत्सर्पिणैकरसेन तुषारपटलेनेवानुलिम्पन्नोशीरचन्दनरसच्छटाभिरिवासिञ्चन्नरावतकरपीवराभ्यां बाहुभ्यां मृणालवलाङ्गुलिकयामतिशीतलस्पर्शाभ्यां तमुपरतमुत्क्षिपन्दुन्दुभिनादगम्भीरेण स्वरेण 'वत्से महाश्वेते, न परित्याज्यास्त्वया प्राणाः, पुनरपि तवानेन सह भविष्यति समागमः' इत्येवमाहतः पितेवाभिधाय सहैवानेन गगनतलमुदपतत् । अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका चोन्मुखी किमिदमिति कपिञ्जलमपृच्छम् । असौ तु ससंभ्रममदत्तैवोत्तरमुदतिष्ठत् । 'सुरारमन् कं मे वयस्यमपहृत्य गच्छसि' इत्यभिधायोन्मुखः सञ्जातकोपो वधनन्तरवेगमुत्तरीयपल्लवेन परिकरमुत्पतन्तं तमेवानुसरन्नन्तरिक्षमुदगात् । पश्यन्त्या एव च मे सर्वं पथि ते तारागणमध्यमविशत् ।

मम तु द्वितीयेनेव प्रियतममरणेन कपिञ्जलागमनेन द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम् । किंकर्तव्यतामूढा च तिरश्चिकामग्रवम्—'अयि न जानासि किमेतद्' इति । सा तु तदवलोक्य स्वीस्वभावकातरा तस्मिन् क्षणे शोकामिमाविना भयेनाभिभूता वेपमानाङ्गयष्टिर्मम मरणशङ्कया च वराकी विषण्णहृदया सकरुणमवादीत्—'भर्तृदारिके, न जानामि पापकारिणी । किं तु महदिदमाश्चर्यम् । अमानुषा-

क्षतिरेष पुरुषः । समाश्वासिता चानेन गच्छता सानुकम्पं पित्रेव भर्तृदारिका । प्रायेण चैवंविधा दिव्याः स्वप्नेऽप्यविसंवादिन्यो भवन्त्याकृतयः । किमुत साक्षात् । न चाल्पमपि विचारयन्ती कारणमस्य मिथ्याभिधाने पश्यामि । अतो युक्तं विचार्यात्मानमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुम् । अतिमहत्खल्विदमाश्वासस्थानमस्यामवस्थायाम् । अपि च तमनुस्मरन्नास एव कपिञ्जलः । तस्मात्कुतोऽयं को वायं किमर्थं वानेनायमपगतासुरतिक्षिप्य नीतः क्व वा नीतः कस्माच्चासम्भाव्यनीयेनासुना पुनःसमागमाशामदानेन भर्तृदारिका समाश्वासितेति सर्वमिदमुपलभ्य जीवितं वा मरणं वा समाचरिष्यसि । अदुर्लभं हि मरणमध्यासितम् । एवाप्येतद्भविष्यति । न च जीवन्कपिञ्जलो भर्तृदारिकामदृष्ट्वा स्थास्यति । तेन तत्प्रत्यागमनकालावधयोऽपि तावद्भियन्तां प्राणाः ।" इत्यभिदधाना पादयोर्मे न्यपतत् । अहं तु तत्कललोकदुर्लङ्घ्यतया जीविततृष्णायाः क्षुद्रतया च स्त्रीस्वभावस्य तया च तद्वचनोपनीतया दुराशानुगतृष्णिकया कपिञ्जलप्रत्यागमनकाङ्क्षया च तस्मिन्काले तदेव युक्तं मन्यमाना नोत्सृष्टवती जीवितम् । आशया हि किमिव न क्रियते । तां च पापकारिणीं कालरात्रिप्रतिमां चर्मसङ्घातगणां यातनामयीमिव दुःखमयीमिव नरकमयीमिवाग्निमयीमनोरथनिद्रां तथैव क्षितितले विचेष्टमाना रेणुकणधूसरैरक्षुजलार्द्रकपोलसन्दानितैर्विमुक्तव्याकुलैः शिरोरुहैरपरुदती निर्दयाक्रन्दजर्जरस्वरक्षयक्षामेण कण्ठेन तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षेपितवती ।

अथूषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चया तत्प्रीत्या तमेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा बुद्ध्वा निःसारतां संसारस्य, धात्वा

च मन्दपुण्यतामात्मनः, निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानाम्, आकलय्य दुर्निवारतां शोकस्य, दृष्ट्वा च निष्ठुरतां दैवस्य, चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य, भावयित्वा चानित्यतां सर्वभावानाम्, अवधार्य चाकाण्डभङ्गुरतां सर्वसुखानाम्, अविगणय्य तातमन्यूं च, परित्यज्य सह परिजनेन सकलबन्धुवर्गं, निवर्त्य विषयसुखेभ्यो मनः, संयम्येन्द्रियाणि गृहीतब्रह्मचर्यां देवं त्रैलोक्यनाथमनाथशरणमिमं शरणार्थिनी स्थाणुमाश्रिता । अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्ततातः सहाम्बया सह बन्धुवर्गेणागत्य सुचिरं कृताक्रन्दस्तैस्तैरुपायैरुक्त्वयंनाभिश्च बहुभिरुपदेशैश्चानेकप्रकारैः परिसान्त्वनैश्च नानाविधैर्गृहागमनाय मे महान्तं यत्नमकरोत् । यदा च नेयमस्माद्व्यवसायात्कथञ्चिदपि शक्यते व्यावर्तयितुमिति निश्चयमधिगतवांस्तदा निराशोऽपि दुस्त्यजतया दुहितृस्नेहस्य पुनः पुनर्मया विसृज्यमानोऽपि बहून्दिवसान्स्थित्वा सशोक एवान्तर्दह्यमानहृदयो गृहानयासीत् । गते च तातं ततः प्रभृति तस्य जनस्याश्रुमोक्षमात्रेण किल कृतज्ञतां दर्शयन्ती तदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायाससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतैः क्षपयन्ती वन्यैश्च फलमूलवारिभिर्वर्तमाना जपव्याजेन तद्गुणगणानिव गणयन्ती शिरसन्यस्य मम . सरसि स्नानमुपसृशन्ती प्रतिदिनमर्चयन्ती देवं त्र्यम्बकमस्यामेव गुहायां तरलिकया सह दीर्घमेवमनुभवन्ती चिरमवसम् । साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च निःस्नेहा च नृशंसा च गर्हणीया निष्प्रयोजनोत्पन्ना निष्फलजीविता निरवलम्बना निःसुखा च । किं मया दृष्टया पृष्टया वा श्रुतब्राह्मणवधमहापातकया करोति महाभाग. ।

—:o:—

VOCABULARY.

अंशु—A ray of light.
अंशुक—Fine cloth.
अंस—The shoulder
अकाण्ड—Sudden.
अकिञ्चन—A pauper.
अक्षमाला (,-मालिका,-सूत्र)—
A rosary.
अक्षावली—A rosary.
अक्षौहिणी—A complete
army representing
the four-fold division
of troops in full.
अग्रसन्ध्या—The morning
twilight. [hand.
अग्रहस्त—The tip of the
अङ्गक्रिया—Cleansing the
body with fragrant
unguents.
अचिरद्युति—Lightning;
momentary splendour
अच्छ—Transparent.
अच्युतम्—(73) Strictly.
अजस्रम्—Incessantly.
अञ्जन—Collyrium.

अतन्द्रिता—(19) Active.
अतिभूमि—Excess, climax.
अतिमानुष—Superhuman.
अत्यय—Expiry.
अत्याहित—A mishap.
अद्धा—Verily. [justice.
अधिकरण—A court of
अधिकार—(71) Duty,
authority.
अधिक्षेप—Censure.
अधिगम—Acquisition.
अधिज्य—Stringed, strung.
अधिदेवता (,-दैवत)—A
guardian deity. [ment.
अधिश्री—(25) More emi-
अधिष्ठान—An abode.
अधीतिनी Reciting hymns.
अध्यवसाय—Resolution.
अध्यवसित Resolved upon.
अध्यात्मवाद—Metaphysics.
अध्यारोपण—Ascription.
अध्वन्—Way, journey.
अनघ—(41) Safe.
अनघा—(14) Stainless.

अनङ्ग—Cupid.
अनम्र—Unyielding.
अनघद्य—Unblemished.
अनार्य—Ignoble.
अनाविल—(23) Untainted.
अनाशास्य—Unsought for.
अनिमित्त—An ill-omen.
अनीक—An army.
अनीश्वर—Unable.
अनुक्रोश—Compassion.
अनुगिरम्—Near the hill.
अनुगोदम्—On the banks of the Godāvarī.
अनुजीविन्—A dependant.
अनुनय—Supplication.
अनुनय—An attendant.
अनुबन्ध—Continuity.
अनुभाव—Dignity.
अनुयोग—(14) A query.
अनुरूप—(18) Worthy.
अनुवृत्ति—Compliance.
अनुशय—Repentance.
अनुशिष्ट—(16) Directed.
अन्वय—Ancestry.
अन्वर्थ—Significant.
अन्तःपुर—A gynaceum.
अन्तराय—An obstacle.

अन्तराल—Interval.
अन्तरीक्ष—The sky.
अपदी—A screen.
अपत्य—Offspring.
अपवाद—Alienation.
अपरान्त The western coast.
अपरेद्युस्—The next day.
अपरोक्ष—Direct.
अपवर्ग—Absolution.
अपवर्जित—(6) Severed.
अपश्चिम—(61) First.
अपाङ्ग—Corner of the eye.
अपुष्कल—Insignificant.
अपेक्षा—(14) Regard.
अपोढ—(11) Removed, (15) discarded.
अप्रबुद्ध—Unenlightened.
अप्रत्यय—Mistrust.
अबन्ध्य—(17) Effectual.
अब्ज—A lotus.
अम्बलयम्—Oh dear!
अभव्य—Ungentle.
अभिचार—Witchcraft.
अभिजन—Pedigree.
अभिजात—Well-born.
अभिज्ञान—A souvenir.
अभिधान—A name

अभिधेय—(96) Expression
अभिनय—Acting.
अभिनिवेश—Intentness.
अभिभव—(2) Overthrow,
(24) abuse.
अभिमर्श—(24) Outrage.
अभियोग—Attack.
अभिषङ्ग—Attachment.
अभिषेक(13,14,19)Ablution
(15, 80) anointment.
अभिसन्धान—Cheating.
अभिसरण—Assignation.
अभ्यभिमFacing theenemy.
अभ्यर्ण—Adjacent.
अभ्युपपत्ति—Favour.
अभ्युपेत—Accepted.
अभ्र—(13, 16) A cloud.
अमर्ष—Anger.
अमानुष—(76) Gigantic,
(112) superhuman.
अम्बर(11) The sky,(29, 92)
apparel, (30) heaven.
अम्बुज—A lotus.
अम्बुराशि—The ocean.
अम्बुरुह—A lotus.
अम्भोज—A lotus.
अय—An auspicious rite.

अयस्—Iron.
अयुग्मलोचन—S'iva.
अरविन्द—A lotus.
अराति—An enemy.
अराल—Curved.
अरुण—Aurora.
अर्क—The sun.
अर्चिस्—(3) Flame, a ray.
अर्णव—The ocean.
अर्थ—Significant.
अलक—A lock of hair.
अलक्तक—Lac.
अलम्—(12,88) Able.
अलीक—False.
अलोकसामान्य—Extraordinary.
अवकाश—Space.
अवकीर्ण—(28) Set on.
अवग्रह—Drought.
अवचय—Culling.
अवतंस—An ear-ring.
अवतीर्ण—(14) Descended
(81) Incarnate.
अवदात—White.
अवधि—(108) Limit.
अवधूत—Slighted.
अवभृत—Ablution at the
close of a sacrifice.

अवरज A younger brother.
अवरोध—The seraglio.
अवलेप—(80) Pride.
अवसरप्राप्त,—(102) Suited to the occasion.
अवष्टम्भ—(88) Stupor, (52,. 100) composure, (102) procedure.
अवस्तु—(28)A trash.
अवाद्दिया—Dissimulation
अवाप्ति—Attainment.
अविनय—Indecorum.
अविसंवादिनी—Consistent with self.
अव्यक्त—(14) Matter in the noumenal state.
अव्यभिचारिन्—(23) True without exception.
अशनि—Thunderbolt.
अश्मन्—Stone.
असम्भ्रम—(7) Unconcern.
असम्बद्धभाषिन्—One who talks incoherently.
असु—Life. [world.
असुरविवर—The nether
असूया—Envy.
असृज्—Blood.
अस्र—A tear.

अहमहमिका—Emulation.
अहार्य—(15) Unshakable.
अहि—A snake.
अहित—(3) An enemy.
अहाय—Quickly.
आकूत—Significance.
आखण्डल—Indra.
आख्या—A name.
आगन्तुक—A new comer.
आचित—Covered, strewn.
आच्छोटन—Snapping.
आजीव—Livelihood.
आटोप—Strut.
आतपत्र—An umbrella.
आतिथेयी—Hospitable.
आत्तगर्व—Humbled. (गर्व—pride).
आदधान—(8) Causing.
आदर—Regard.
आदृत—(15) Regardful, (112) interested.
आत्मभू—Brahma.
आधि—(43) A bane.
आध्मात—Inflated.
आपन्नसत्त्वा—Pregnant.
आपानभूमि—A wassail ground.

आप्त(68,71,82) A kinsman
आप्तजन्मन्—(19) Born.
आप्तवाच्—A seer, a sage.
(आप्त—Authentic)
आभरण—Ornament.
आमुष्मिक—(71) Spiritual
आयत—Long.
आयतन—(76) Abode
आयुध—A weapon
आर्त—Distressed.
आर्ति—Distress
आर्द्र—Moist, soft
आर्यपुत्र—Husband
आलवाल A basin for water round the root of a tree
आलान—(7) A tether, (8) a tying post (fidante
आली—A woman's con-
आलीन—Clinging to
आलेख्य—A painting.
आलोल—(89) Dishevelled
आवर्जित—(10, 11) Bent, (22) sprinkled
आवर्जितवती—(75) Having bewitched
आवर्त—(10) An eddy
आविल—(12) Foul, turbid

आविष्ट—(110) Frenzied.
आवेग—Hurry.
आवेश—(80) Influence (a by an evil spirit).
आशा—(5) A direction.
आशीविष—A serpent
आश्यान—Dried up
आषाढ—(22) A पलाश star
आसङ्ग (16) Contact, (19) garment, (77) attachment
आसन्न—Adjacent
आसव—(4) Ale
आसार—A shower.
आस्थान—Assembly.
आस्पद (18, 25, 28) Place
आहत—(3) Smitten
आहित—(107) Caused.
आहिताग्नि—Agnihotrin.
आह्वोस्यित्—Or.
इङ्गित—(27) Intention.
इन्दीवर—A blue lotus
इन्द्रजाल—Magic.
इन्द्रजालिक—A juggler.
इन्द्रनील—A sapphire.
इन्धन—Fuel.
इभ—An elephant.
इभ्य—A rich man.

इयत्ता—Quantitativeness.
इषु—An arrow.
इष्टि—A sacrifice.
ईदृक्ता—Qualitativeness.
ईप्सितार्थ—(17) An object of desire.
उचित—(14) Accustomed.
उक्षन्—An ox.
उच्चय—(33) Picking up from the ground, (73) a collection.
उच्चैःश्रवस्—A horse so named.
उच्छित्ति—Incision.
उच्छ्राय—Height.
उच्छ्वसित—(87) A sigh.
उच्छ्वास—Breath, sigh.
उटज—A cottage.
उडुपति—The moon. (उडु a star).
उत्कण्ठा—Anguish.
उत्कलिका—A wave; a love-longing.
उत्कीर्ण Carved, a carving.
उत्खात(4)Uprooted;ousted
उत्तमाङ्ग—The head.
उत्तमाङ्गना—A beautiful lady, a courtesan.
उत्तर (2) Latter, (9,27,72) prominent, (19)upper
उत्तरीय An upper gurment.
उत्तरेद्युस्—On the morrow.
उत्तान—(89) Upturned, (105) Supine.
उत्पतिष्णु—Flying up.
उत्पल—A lotus or lily.
उत्सङ्ग Lap, (7) Surface.
उत्सारण—Dispersion.
उत्सारित(5) Pushed afar.
उत्सेक—Pride, conceit.
उत्सेध—Height.
उदग्र (3)Wild, (13) high.
उदधि—The ocean, a sea.
उदन्वत्—The ocean.
उदम्भस्—Rich in water.
उदवास—Lying in water.
उदात्त—(61) Illustrious.
उदार—(16, 23) Large.
उदीच्य—Northern.
उदीर्ण—Intense.
उद्गम—Appearance.
उद्गमनीय A suit of clothes
उद्गार—(6) Effusion.
उद्दाम—Wild.
उद्देश—A tract of land.

उड्डूत—Flying up, fluttering

उड्डान्त—(5) Flying over

उद्यत—(2) Wielded,(4,5) armed, accoutred.

उद्विग्नवर्ण Looking uneasy.

उन्मदन—Impassioned

उन्मिषित—(21) A glance.

उन्मेष—Winking

उपकण्ठ—(4) Coast, (13) Precinct

